॥ श्रीः ॥

॥ वेदान्तसिद्धान्तादर्शः ॥

श्रीमदुदासीनवरश्रीईमुकुन्ददासशिष्येण, काशिकराज-
कीयप्रधानसंस्कृतपाठशालायां दर्शनशास्त्राऽध्यापकेभ्यो
ब्रह्मामृतवर्षिणीसभासम्पादकेभ्यः श्रीईरामिमिश्र-
शास्त्रिभ्योऽधिगतवेदवेदाङ्गादिविविधविद्येन,
सां॰ यो॰ वेदान्ताचार्य्येण, श्रीमोहनलाला-
भिधेन साधुना, वेदान्तीयबृहद्ग्रन्थेषु
प्रविविक्षूणां मन्दमध्यमाधिका-
रिणां कृते प्रणीतः

श्रीमद्-डाकृर ई॰ जे॰ लाज़रससाहेबात्मज-श्रीमद्-
आर्थर-वेनिस-महाशयानुमत्या मुद्रां नीत्वा
प्रकाशितश्च ।

काश्याम्

मेडिकल-हाल्-नामकयन्त्रालये मुद्रितोयं यन्थः ।

संवत् १९४३ ।

मूल्यम् १)

॥ श्रीः ॥

॥ वेदान्तसिद्धान्तादर्शः ॥

श्रीमदुदासीनवरश्रीईमुकुन्ददासशिष्येण, काशिकराज-
कीयप्रधानसंस्कृतपाठशालायां दर्शनशास्त्राऽध्यापकेभ्यो
ब्रह्मामृतवर्षिणीसभासम्पादकेभ्यः श्रीईराममिश्र-
शास्त्रिभ्योऽधिगतवेदवेदाङ्गादिविविधविद्येन,
सां० यो० वेदान्ताचार्य्येण, श्रीमोहनलाला-
भिधेन साधुना, वेदान्तीयबृहद्ग्रन्थेषु
प्रविविक्षूणां मन्दमध्यमाधिका-
रिणां कृते प्रणीतः

श्रीमद्-डाक्टर ई० जे० लाज़रससाहेबात्मज-श्रीमद्-
आर्थर-वेनिस-महाशयानुमत्या मुद्रां नीत्वा
प्रकाशितश्च ।

काश्याम्
मेडिकल्-हाल्-नामकयन्त्रालये मुद्रितोयं ग्रन्थः ।

संवत् १९४३ ।

॥ भूमिका ॥

यद्यपि वेदान्तमतसम्प्रदायप्रवर्तकैरनुप्रवर्तकैर्व्यासशङ्करप्रभृतिभिराचार्य्यैर्विरचिताः सन्त्यनेकेऽतिविस्तरा निबन्धास्तथापि तेषु प्रविविक्षूणां मन्दमध्यमाधिकारिणां कृते नेदानींयावदेतादृशो ग्रन्थः केनापि व्यरचि येनैकेनैवाधीतेनानायासं शारीरकभाष्यादिसमस्तबृहद्वेदान्तग्रन्थाध्ययनसामर्थ्यं स्यात् तदेतदालोच्यायमत्यल्पविस्तरो महाफलो वेदान्तसिद्धान्तादर्शो नाम ग्रन्थो निरमायि ; आशासे च प्रायोऽस्याध्ययनेन वेदान्तशैलीं परिज्ञायाऽनायासेनैव लोका बृहद्वेदान्तग्रन्थाध्ययनसमर्था भवेयुरिति । अस्य च ग्रन्थस्य "वेदान्तसिद्धान्तादर्श"—इति पूर्णं नाम, ततं उच्चारणसौकर्य्यार्थं "वेदान्तादर्श" "आदर्शः"—इत्यपि च लोकैर्वक्तुं शक्यम् ; यथा, खण्डनखण्डखाद्यं "खाद्यखण्डनं" "खण्डनम्"—इति प्रकीर्तयन्ति । अस्य च ग्रन्थस्य चत्वार आदर्शा आदर्शवदर्थदीपका राजन्तेऽन्वर्थकाः । तत्राद्यः सञ्ज्ञादर्शो वेदान्तकोशत्वात्सर्ववेदान्तग्रन्थोपकारकः । यद्यपि वेदान्तस्याऽसाधारण्यस्सञ्ज्ञा अल्पीयस्य एव तथापि व्यवहारदशायां वेदान्तसिद्धान्ताविरोधिन्यः परतन्त्रसिद्धान्तसिद्धाः सर्वतन्त्रसिद्धान्तसिद्धा वा या या वैदान्तिकैरुपादीयन्ते ता अपि याःकाश्चिदिहोपन्यस्ताः । प्रायोऽस्मिन्नादर्शे शाङ्करवेदान्तसञ्ज्ञाः सर्वा एव, मध्व*-रामानुजविष्णुस्वामिवल्लभाचार्य्यादीनां वैदान्तिकानां सञ्ज्ञास्तु मुख्या याःकाश्चिदेवोपन्यास्थम् ; तद्व्याख्याने आदर्शालोके तु सञ्ज्ञेया-

* यत्र वेदान्तादर्शे मध्वादेर्नामग्रहणमन्तरोक्तिस्तत्र सर्वत्र शाङ्करमतेनैव प्रतिपादनं बोद्धव्यम् ।

र्थानां लक्षणानि काश्चिच्च मूलानुक्तास्सञ्ज्ञास्तल्लक्षणानि चोक्तानि । द्वितीये उत्पत्तिप्रलयादर्शे तु शाङ्करमतमनुसृत्य जगदुत्पत्तिप्रलयप्रक्रिया सचित्रमुपन्यस्ता । अयमादर्शो भाष्यादावाकरग्रन्थे प्रवृत्तिसाधनः । तृतीयो यौक्तिकादर्शस्तु यौक्तिके खण्डनादौ बृहद्ग्रन्थे प्रवृत्तिसाधनः । चतुर्थो मतभेदादर्शस्तु मतभेदप्रतिपादके सिद्धान्तलेशादौ प्रवृत्तिसाधनत्वात्सुनिर्मितः, एवं च चत्वारोप्यादर्शा अस्य यथायथं सार्थका एवेति ध्येयम् ॥

यद्यपि वेदान्तसिद्धान्ते एक एव नित्यशुद्धबुद्धमुक्तस्वभाव उपनिषन्मात्रगम्यो वस्तुतोस्तीति न तस्मिन्सञ्ज्ञासञ्ज्ञेयाद्यभिधानं युक्तं तथाप्यनृतजडदुःखात्मकानेकभेदभिन्नं प्रपञ्चं साक्षादध्यस्यतोऽविवेकिनः प्रथमत एव तथोपदेशान्न नित्यशुद्धमुक्ताद्वितीयचिन्मात्रप्रतिपत्तिर्भवेदिति तद्बुद्धिस्थामशेषजगद्विकल्पनामाश्रित्य तदपवादेनाऽद्वैतप्रतिपत्त्यर्थं तदनुगुणं सञ्ज्ञासञ्ज्ञेयादिद्वैतप्रतिपादनं नाऽश्लिष्टं पूर्वाचार्याणाम् । तदुक्तम्—"अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते" इति ।

तस्मात् सर्वमवदातम् ।

मूर्ध्नाऽहं विदुषां प्रणम्य परितः पादाविदं प्रार्थये ।
यन्मौढ्यात्पदतोऽर्थतश्च गलितं मत्तोऽत्र यद्यद्भवेत् ॥
तत्तत्सर्वमिदं सुशोध्य कृपया पश्यन्तु सन्तोऽनघाः ।
दोषान्मेऽविगणय्य दूषणनिधेर्दोषे गुणग्राहिणः ॥

मोहनलालनामा—

वेदान्ताचार्य्यः ।

सूचीपत्रम् ।

(अ)	पृष्ठ
अखण्डत्वम्	१४
मी॰ †अख्यातिः	३८
अग्निपक्वनयः पञ्च	५६
अजन्यज्ञानम्	५
अजन्यसुखम्	६७
अजहल्लक्षणा	१४
अजिह्वादिभिक्षुषट्कम्	४४
अजिह्वो भिक्षुः	४४
अज्ञानद्वयम्	४
अज्ञानभूमिसप्तकम्	४७
अज्ञानम् (मूलप्रकृतिः, प्रलयावस्था, अव्याकृतम्, अव्यक्तम्, अक्षरम्, अविद्या, तमः)	४
अज्ञानावस्थासप्तकम्	४६
अतलादिसप्तकम्	४६
अतिवादः	५७
न्या॰ अतिव्याप्तिः	२४
न्या॰ अतिव्याप्त्यादित्रयम्	२४
अतिशयतापः	११
अत्यन्ताभावः	७२
अधिकारी	२–२८
अधिदैवतम्	७२
अधिभूतम्	७२
अधोधावन्त्यनवस्था	४३

	पृष्ठ
अध्यात्मम्	७२
अध्यात्मादित्रयम्	७२
अध्यासद्वयम्	३
अध्यासः (अध्यारोपः, विभ्रमः, विपर्य्ययः)	३
अनवस्था	४२
अनवस्थादोषत्रयम्	७३
अनवस्थाद्वयम्	४२
अनादिषट्कम्	७१
अनिच्छाप्रारब्धम्	१३
अनित्यविभूतिः (एकपाद्विभूतिः)	७
अनिर्वचनीयख्यातिः	३८
अनुदयोऽर्थापत्तिदोषः	२४
अनुपलब्धिः (योग्यानुपलब्धिः)	४२
अनुबन्धचतुष्टयम्	२७
अनुमानम्	२९
अनुमितिः	२९
अनुमितिद्वयम्	२९
अनुवादः	४०
अन्तरङ्गम् (ज्ञाने)	६६
अन्तरिन्द्रियम्	६६
अन्तर्मदाष्टकम्	५१
अन्तःकरणचतुष्टयम्	२८

† यद्यप्यनादिसिद्धानाममूषां सञ्ज्ञानां सर्वासां सर्वस्मिन्शास्त्रे प्रायेणोपलम्भादेताः प्राचीनास्तदाचार्य्यनिर्मिता एताश्चार्वाचीना एतदाचार्य्यनिर्मिता इति विवेको दुष्करस्तथाप्यापाततो विवेकार्थं परेषां मीमांसा-न्याय-साङ्ख्य-योग-शून्यवादि-विज्ञानवादि-पुराण-धर्मशास्त्रा-ऽऽलङ्कारिकाणां या उपयुक्तास्सञ्ज्ञा इह वेदान्तसञ्ज्ञाप्रकरणे उपन्यास्यं तासां क्रमेण सूचनार्थं सञ्ज्ञानामादौ मी॰ न्या॰ सां॰ यो॰ शू॰ वि॰ पु॰ ध॰ आ॰—इत्याद्याद्याक्षरमुपन्यास्यं तत्वन्तव्यागाः स्याम् ।

	पृष्ठ
अन्धतामिस्रः (अभिनिवेशः)	३७
अन्धो भिक्षुः	४४
अन्नमयकोशः	३२
अन्नसूक्तम्	४६
अन्यथाख्यातिः	३८
अन्यथाप्युपपत्तिः	२४
अन्यथैवोपपत्तिः	२४
अन्योन्याभावः	७२
अन्योन्याश्रयः	४२
अन्वयः	६६
अपक्षयो विकारः	३६
यो॰ अपरवैराग्यम्	१०
यो॰ अपरवैराग्यं चतुर्विधम्	३१
अपरोक्षज्ञानम्	५
अपवादः	६६
अपूर्वता	३६
अपूर्वविधिः	६६
अभानावरणम्	४
अभावद्वयम्	७२
अभावप्रमा	४२
अभिधानानुपपत्तिः	४१
अभिनिवेशः	३७
अभिहितानुपपत्तिः	४१
अभ्यासः	३६
अरिषड्वर्गः	३८
अर्थवादस्त्रिविधः	४०
अर्थवादः	४०
अर्थाध्यासः	३
अर्थापत्तिः	४१
अर्थापत्तिदोषत्रयम्	२४
अवयवत्रयम्	२६
अवस्थात्रयम्	१२
अवस्थाषट्कम् (जायदादि)	१२
अवस्थाषट्कम् (शिशुत्वादि)	४०
अवान्तरवाक्यम्	६८
अविकृतपरिणामः	७

	पृष्ठ
अविद्या	३७
अविद्याद्वयम्	८
यो॰ अविद्यापर्वाणि पञ्च	३७
अविनिगम्यत्वम् (विनिगमनाविरहः)	४३
न्या॰ अव्याप्तिः	२४
अशास्त्रीयद्वैतम्	६७
शू॰ असत्ख्यातिः	३८
असदावरणम्	४
न्या॰ असम्भवः	२४
असम्भावना	८
असम्भावनाद्वयम्	८
असिद्धिः	५८
असुरभिगन्धः	११
असूया	५५
असंसक्तिः	४८
अस्तित्वविकारः	३६
अस्थितप्रज्ञा	६
अस्थ्यादिपञ्चदशकम्	५४
अस्मिता	३७
अहङ्कारद्वयम्	१०
अहङ्कारः (गर्वः)	१०–२८–५५
(आ)	
न्या॰ आकाङ्क्षा	७०
आकाशप्रकृतयः पञ्च	५६
आगामिकर्म	२५
वि॰ आत्मख्यातिः	३८
आत्मत्रयम्	२६
आत्मत्रयं (प्रकारान्तरेण)	७०
आत्माश्रयादिदोषषट्कम्	४२
आत्माश्रयः	४२
पु॰ आत्यन्तिकप्रलयः	३५
आधिदैविकतापः	१५
आधिभौतिकतापः	१५
आध्यात्मिकतापद्वयम्	११
आध्यात्मिकतापः	११–१५
आनन्दत्रयम्	२३
आनन्दप्राप्तिः	७

		पृष्ठ
	आनन्दमयकोशः	३२
	आनन्दः	२३
	आन्तरदृश्यानुविद्धसमाधिः	३८
	आन्तरनिरुपाधिकाध्यासः	३
	आन्तरनिर्विकल्पसमाधिः	३८
	आन्तरप्रपञ्चः	६
	आन्तरशब्दानुविद्धसमाधिः	३८
	आन्तरसोपाधिकाध्यासः	३
	आन्ध्यादित्रयम्	२२
	आरम्भकारणम्	७२
	आवरणद्वयम्	४
	आवरणशक्तिः	४
	आशीर्वादात्मकमङ्गलम्	१
ध॰	आश्रमचतुष्टयम्	२७
	आसत्तिः	७१
यो॰	आसनम्	४८
	आसुरसम्पद्गुणाः	५७
	आहारस्त्रिविधः	१७
	(इ)	
	इच्छाप्रारब्धम्	१३
	इन्द्रियाधिष्ठातृदेवतापञ्चदशकम्	५४
	(ई)	
	ईर्ष्या	५५
यो॰	ईश्वरप्रणिधानम्	३५
	ईश्वरसाक्षिप्रत्यक्षम्	८
	ईश्वराश्रया प्रमा	५
	ईश्वरः	११–४६
	(उ)	
	उक्त्यादिपञ्चकम् (वचनादिपञ्चकम्)	३३
पु॰	उत्पत्त्यादि(भग)षट्कम्	४५
	उदानवायुः	३४
	उदाहरणम् (दृष्टान्तः)	२६
	उद्भिज्जम्	३०
ध॰	उपकुर्वाणो ब्रह्मचारी	२७
	उपक्रमोपसंहारौ	३६
	उपनयः	२६
	उपपत्तिः	४०
	उपमानप्रमाणम्	४२
	उपमितिप्रमा	४२
	उपरतिः (संन्यासः)	२१–४४
	उपलक्षणम्	७०
	उपवायुपञ्चकम्	३४
	उपाङ्गानि (वेदस्य)	७१
	उपादानकारणत्रयम्	७२
	उपादानकारणम्	१७
	उपाधिः	७०
	उपेक्षा	३०
	(ऊ)	
	ऊर्ध्वं धावन्त्यनवस्था	४३
	ऊर्मिषट्कम्	३६
	(ए)	
यो॰	एकाग्रभूमिः	३५
यो॰	एकेन्द्रियवैराग्यम्	३१
	एषणा	२२
	एषणात्रयम्	२२
	(ऐ)	
पु॰	ऐश्वर्य्यादि(भग)षट्कम्	४५
	(क)	
	कमण्डल्वादिधरः संन्यासः	१०
	करणत्रयम्	१२
	करुणा	३०
	कर्ता	५२
	कर्तृत्रयम्	१६
	कर्मजन्यतादात्म्यम्	२२
	कर्मत्रयम् (पुण्यादि)	१३
	कर्मत्रयम् (सात्त्विकादि)	१६
	कर्मत्रयम् (सञ्चितादि)	२५
ध॰	कर्मपञ्चकम् (नित्यादि)	३३
ध॰	कर्मषट्कम् (स्नानादि)	४१
	कर्मेन्द्रियपञ्चकम्	३३
	कला	२६

	पृष्ठ
कषायः	२६
कामः	२६—५५
ध० काम्यकर्म	३३
कारणद्वयम्	१७
कारणप्रपञ्चः	२०
कारणम्	१७
कारणशरीरम्	१२
कालत्रयम्	२०
कालिकपरिच्छेदः	२०
किशोरावस्था	४०
कुटीचकः संन्यासी	३१
यो० कुम्भकप्राणायामः	२२
कूर्म उपवायुः	३४
कृकल उपवायुः	३४
केवलप्रारब्धम्	१४
श्रा० केवललक्षणा	१४
कैवल्यद्वयम् (निःश्रेयसद्वयम्)	७
कोशपञ्चकम्	३२
कौशिकाषट्कम्	३६
ध० कौमारावस्था	४०
यो० क्रमनिग्रहः	१०
क्रमसृष्टिः	६७
क्रिया	२७
क्रोधः	५५
यो० क्लेशपञ्चकम्	३७
क्षयतापः	११
यो० क्षिप्तभूमिः	३५
(ख)	
ख्यातिपञ्चकम्	३८
(ग)	
गन्धद्वयम्	११
गन्धः	११
गुणत्रयम्	१५
मी० गुणवादः	४०
गुणः	२७
गुणाः पञ्चसप्ततिः	५७

	पृष्ठ
ध० गृहस्थाश्रमः	२७
गौणात्मा	७०
(च)	
चक्रकदोषः	४२
चतुर्दश विद्याः	७१
चतुर्व्यूहम् (वासुदेवादि)	३२
चन्द्रलोकमार्गः (धूमादि-मार्गः)	१८
चित्तजययुक्तिचतुष्टयम्	३१
चित्तभूमिपञ्चकम्	३५
चित्तम्	२८
चैतन्यसप्तकम्	४६
चोद्यम्	५८
(ज)	
जनिविकारः	३६
जन्यज्ञानद्वयम्	५
जन्यज्ञानम्	५
जन्यसुखम्	६७
जरायुजम्	३०
जलप्रकृतयः पञ्च	५६
श्रा० जहदजहल्लक्षणा (भागत्यागलक्षणा)	१४
श्रा० जहल्लक्षणा	१४
जाग्रज्जाग्रत्	२५
जाग्रत्त्रयम्	२५
जाग्रदवस्था	१२
जाग्रत्सुषुप्तिः	२५
जाग्रत्स्वप्नः	२५—४७
जातरूपधरः संन्यासः	१०
जातिः	२७
जीवचतुष्टयम् (रामानुजमतेन)	३२
जीवत्रयम्	१२
जीवत्रयं (प्रकारान्तरेण)	६६
जीवन्मुक्तिः	८
जीवसाक्षिप्रत्यक्षम्	८

	पृष्ठ
जीवाश्रयप्रमाद्वयम्	५
जीवाश्रया प्रमा	५
जीवः (क्षेत्रज्ञः)	१२-४६
जुगुप्सा	५७
ज्ञाता	१९-५२
ज्ञात्रादित्रयम्	१९
ज्ञानत्रयम्	१६
ज्ञानद्वयम्	२१-५
ज्ञानप्रतिबन्धत्रयम्	१३
ज्ञानभूमिसप्तकम्	४७
ज्ञानम्	१४-१९-२१
ज्ञानाङ्गद्वयम्	६६
ज्ञानात्मा	२६
ज्ञानादित्रयम्	२१
ज्ञानाध्यासः	३
ज्ञानेन्द्रियपञ्चकम्	३३
ज्ञेयम्	५२
(त)	
तत्त्वत्रयम्	२३
तनुमानसा	४७
तपः	३५
तपस्त्रिविधम्	१६
यो॰ तमः (अविद्या)	३७
तात्पर्यनिर्णायकलिङ्गषट्कम्	३९
तात्पर्यं द्विविधम्	६८
तादात्म्यत्रयम्	२२
तापत्रयम्	१५
तामस आहारः	१७
तामसदानम्	१६
तामससुखम्	१६
तामसो यज्ञः	१६
तामसं कर्म	१६
तामसं ज्ञानम्	१६
तामसं तपः	१६
तामसः कर्ता	१६
यो॰ तामिस्रः (द्वेषः)	३७
तितिक्षा	४४
तुर्य्यावस्था (तुरीयाऽवस्था)	४८

	पृष्ठ
तूलाऽविद्या (कार्य्याऽविद्या)	८
तूलाऽविद्या चतुर्विधा	३७
तैजसो जीवः	१२
त्रिपुटी	१९
(द)	
दमः	४४
दम्भः	५५
दर्पः	५५
दानम्	५८
दानं त्रिविधम्	१६
दुःखनिवृत्तिः	७
दृक्	८
दृश्यत्वम्	१९
दृश्यानुविद्धसमाधिः	३८
(ब्रह्मणि जगद्भाने) दृष्टान्तपञ्चकम्	३७
दृष्टार्थापत्तिः	४१
दृष्टिसृष्टिः	६५
देवदत्त उपवायुः	३४
देहवासना	२१
दैनन्दिनप्रलयः	३६
दैवीसम्पद्गुणाः	५८
देशिकपरिच्छेदः	२०
द्वेषः	३७-५५
द्वैतं द्विविधम्	६७
(ध)	
धनञ्जय उपवायुः	३४
धर्मः	२६
धातुसप्तकम्	४८
यो॰ धारणा	५०
यो॰ ध्यानम्	५०
ध्वन्यात्मा शब्दः	११
(न)	
नमस्कारात्मकमङ्गलम्	१
नाग उपवायुः	३४
नाडीदशकम्	५३

		पृष्ठ
	नाडीदेवतादशकम्	५४
	नादादित्रयम्	२६
	नादः	२६
न्या॰	निगमनम्	२९
यो॰	निग्रहद्वयम्	१०
यो॰	निग्रहः (निरोधः, प्रत्याहारः)	१०
	नित्यकर्म	३३
	नित्यप्रलयः	३५
	नित्यविभूतिः (त्रिपाद्विभूतिः)	७
	निदिध्यासनम्	१९
	निमित्तकारणम्	१७
यो॰	नियमपञ्चकम्	३५
मी॰	नियमविधिः	६९
यो॰	निरुद्धभूमिः	३५
	निरुपाधिकाध्यासः	३
यो॰	निर्विकल्पसमाधिः, निर्बीजः, असम्प्रज्ञातः	६
ध॰	निषिद्धं कर्म	३३
	निषेधमुखप्रवृत्तिः	६८
ध॰	नैमित्तिककर्म	३३
	नैमित्तिकप्रलयः, (मन्वन्तरप्रलयः)	३६
ध॰	नैष्ठिको ब्रह्मचारी	२७

(प)

		पृष्ठ
	पङ्गुभिक्षुः	४४
	पदार्थद्वयम्	८
	पदार्थाऽभावनी	४८
	परमहंसः संन्यासी	३१
यो॰	परवैराग्यम्	१०
	परार्थानुमितिः	२९
	परा वाक्	२६
	परिग्रहः	५८
	परिच्छेदत्रयम्	२०
	परिणामः	३९-७२
	परिणामिकारणम्	७२
	परितापः	५७
	परिवादः	५७
मी॰	परिसङ्ख्याविधिः	६९
	परोक्षप्रारब्धम्	१३
	परोक्षज्ञानम्	५
	पश्यन्ती	२६
	पापकर्म	१३
	पापकर्मत्रयम्	१३
	पापमुत्कृष्टम्	१३
	पापं मध्यमम्	१३
	पापं सामान्यम्	१३
	पारमार्थिकजीवः	७०
	पारमार्थिकी प्रमा	५
	पारमार्थिकी सत्ता	१७
	पारुष्यम्	५८
	पाशाष्टकम्	५१
	पुण्यकर्म	१३
	पुण्यकर्मत्रयम्	१३
	पुण्यमुत्कृष्टम्	१३
	पुण्यं मध्यमम्	१३
	पुण्यं सामान्यम्	१३
	पुत्रैषणा	२२
	पुरुषार्थचतुष्टयम्	२६
	पुर्यष्टकम्	४९
यो॰	पूरकप्राणायामः	२२
	पृथिवीप्रकृतयः पञ्च	५६
	पैशुन्यम्	५७
	प्रकृतयः पञ्चविंशतिः	५७
	प्रकृत्यष्टकम्	५०
	प्रज्ञाद्वयम्	६
	प्रतिज्ञा	२९
	प्रतिबन्धः	१३
	प्रत्यक्षद्वयम्	८
	प्रत्यक्षप्रमा	२९
	प्रत्यक्षप्रमाणम्	२९
	प्रत्यक्षबाधः	६९
यो॰	प्रत्याहारः	५०
	प्रपञ्चत्रयम्	२०
	प्रपञ्चद्वयम्	६
	प्रपञ्चप्राप्तिमार्गः	१८

	पृष्ठ
प्रपञ्चः	१६
प्रमाणगतविपरीतभावना	६
प्रमाणगतसंशयः	८
प्रमाणगताऽसम्भावना	८
न्या॰ प्रमाणचतुष्टयम्	२६
प्रमाणचैतन्यम्	४६
प्रमाणदोषः	२५
प्रमाणम्	२६
प्रमाणषट्कम्	४१
प्रमाता	४६
प्रमा	२६–५
प्रमातृदोषः	२५
प्रमात्रादिदोषत्रयम्	२४
प्रमाद्वयम्	५
प्रमेयगतविपरीतभावना	६
प्रमेयगतसंशयः	८
प्रमेयगताऽसम्भावना	६
प्रमेयचैतन्यम्	४६
प्रमेयदोषः	२५
प्रयोजनम् (वेदान्तस्य)	२–२८
प्रलयपञ्चकम्	३५
प्राग्लोपदोषः	४३
प्राज्ञः	१२
प्राणपञ्चकम् (वायुपञ्चकम्)	३४
प्राणमयकोशः	३२
प्राणः	३४
यो॰ प्राणादेर्नव वर्णाः	५३
यो॰ प्राणायामत्रयम्	२२
यो॰ प्राणायामः	२२
प्रातिकूल्यम्	५८
प्रातिभासिकजीवः	७०
प्रातिभासिकसत्ता (प्रातीतिकसत्ता, ज्ञातसत्ता)	१७
ध॰ प्रायश्चित्तम्	३३
प्रारब्धकर्म	१३–२५

	पृष्ठ
प्रारब्धकर्मद्वयम्	१४
प्रारब्धत्रयम्	१३
(फ)	
फलचैतन्यम्	४६
फलम्	३९
फलव्याप्तिः	६८
फलाभिसन्धिकृतं प्रारब्धम्	१४
(ब)	
बधिरो भिक्षुः	४५
बहिरङ्गं (ज्ञाने)	६६
बहिरिन्द्रियम्	६६
बहिर्मठाष्टकम्	४५
बहूदकः संन्यासी	३१
बाधसामानाधिकरण्यम्	६७
बाधः(अपवादः)त्रिविधः	६९
बाल्यावस्था	४०
बाह्यदृश्यानुविद्धसमाधिः	३८
बाह्यनिरुपाधिकाध्यासः	३
बाह्यनिर्विकल्पसमाधिः	३८
बाह्यप्रपञ्चः	६
बाह्यशब्दानुविद्धसमाधिः	३८
बाह्यसोपाधिकाध्यासः	३
बीजजाग्रत् (महामोहः)	४७
बुद्धिः	२८
ध॰ ब्रह्मचर्याश्रमः	२७
ध॰ ब्रह्मचारी द्विविधः	२७
ब्रह्मज्ञानभूमिचतुष्टयम्	३०
ब्रह्मत्रयम्	११
ब्रह्मप्रलयः (महाप्रलयः)	३६
ब्रह्मलोकमार्गः (देवलोकमार्गः, अर्चिरादिमार्गः)	१८
ब्रह्मवित् (सत्त्वापत्तिः)	३०
ब्रह्मविद्वरः (असंसक्तिः)	३०
ब्रह्मविद्वरिष्ठः (तुर्य्यगा)	३०
ब्रह्मविद्वरीयान् (पदार्थाभावनी)	३०
ब्रह्मानन्दः	२३

(भ)	पृष्ठ
भक्तिः	५५
भावविकारषट्कम्	३६
भाविकालः	२०
भाविप्रतिबन्धद्वयम्	१४
भिक्षुषट्कम्	४४
पु॰ भुवनत्रयम् (लोकत्रयं, धामत्रयं, जगत्त्रयम्)	१८
पु॰ भुवनानि चतुर्दश	५४
भूतकालः	२०
भूतग्रामचतुष्टयम्	३०
भूतप्रतिबन्धः	१४
मी॰ भूतार्थवादः	४०
भूरादिलोकसप्तकम्	४६
भेदत्रयम्	२०
भोक्ता	५२
भोगः	५२
भोग्यम्	५२
भ्रमनिवर्तकदृष्टान्तपञ्चकम्	३६
भ्रमपञ्चकम्	३६
भ्रमषट्कम् (कुलाभिमानादि)	४५
भ्रान्तिजन्यतादात्म्यम्	२२
(म)	
मङ्गलत्रयम्	१
मङ्गलम्	१
मत्सरः	५५
मदः	५५
मननम्	१६
मनोमयकोशः	३३
मनः	२८
मरणावस्था	१२
महाजाग्रत्	४७
महानात्मा	२६
यो॰ महामोहः (रागः)	३७
महावाक्यम्	६८
मार्गत्रयम्	१८
मानसस्तापः	११

	पृष्ठ
मानः	५७
माया—(समष्टिकारणशरीरम्, आनन्दमयकोशः, सुषुप्तिः)	४
मायादृष्टिस्त्रिविधा	१७
मिथ्यात्मा	७०
मिश्रितकर्म	१३
मिश्रितकर्मत्रयम्	१३
मिश्रितमुत्कृष्टम्	१३
मिश्रितं मध्यमम्	१३
मिश्रितं सामान्यम्	१३
मुक्तिद्वयम्	७
मुख्यसामानाधिकरण्यम्	६७
मुख्यात्मा	७०
मुग्धो भिक्षुः	४५
मुदिता	३०
मूर्च्छा	१२
मूढावस्था (मूढभूमिः)	३५
मूर्त्तित्रयम्	१८
मूर्तिमदाष्टकम्	५१
मूलाविद्या (=कारणाविद्या)	८
मैत्री	३०
मैत्र्यादिभावनाचतुष्टयम्	३०
मैथुनाङ्गाष्टकम्	५०
मोक्षः (मुक्तिः, निःश्रेयसम्)	२६
मोहः (अस्मिता)	३७—५५
मौनादिसप्तकम्	४८
(य)	
यज्ञस्त्रिविधः	१६
यो॰ यतमानवैराग्यम्	३१
यतयश्चतुर्विधाः	३१
यो॰ यमपञ्चकम्	३५
युगपत्सृष्टिः	६७
योगशक्तिः	७१
यो॰ योगाङ्गाष्टकम्	५०
योग्यता	७०
योग्यानुपलब्धिः	४२

	पृष्ठ
यौक्तिको बाधः	६६
ध॰ यौवनावस्था	४०
(र)	
रन्ध्राणि दश	५३
रन्ध्राणि नव	५३
रन्ध्राण्येकादश	५३
रसषट्कम्	४५
रसः	४५
रसास्वादः	२६
रागः	३७–५५
रागादिषोडशकम्	५५
राजस आहारः	१७
राजसदानम्	१६
राजससुखम्	१६
राजसो यज्ञः	१६
राजसं तपः	१६
राजसं ज्ञानम्	१६
राजसः कर्त्ता	१६
रूढिशक्तिः	७१
रूपम्	४५
रूपषट्कम्	४५
यो॰ रेचकप्राणायामः	२२
(ल)	
न्या॰ लक्षणदोषत्रयम् (अति-व्याप्त्यादित्रयम्)	२३
लक्षणम्	२३
आ॰ लक्षणा	१४
आ॰ लक्षणा द्विविधा	१४
आ॰ लक्षितलक्षणा	१४
लक्ष्यलक्षणभावसम्बन्धः	१५
लयः	२६
लिङ्गम् (हेतुः)	२६
लिङ्गशरीरम् (सूक्ष्मशरीरम्)	५५
लिङ्गावयवाः चतुर्विंशतिः	५६
लिङ्गावयवाः षट्त्रिंशत्	५६
लिङ्गावयवाः षण्णवतिः	५६
लिङ्गावयवाः सप्तदश	५५

	पृष्ठ
लिङ्गावयवा एकोनविंशतिः	५६
लोकैषणा	२२
लोभः	५५
लौकिकी शाब्दी प्रमा	६१
(व)	
वक्तृतात्पर्यम्	६८
वधिरो भिक्षुः	४५
ध॰ वर्णचतुष्टयम्	२७
वर्णः	२६
वर्णात्मकः शब्दः	११
वर्तमानप्रतिबन्धश्चतुर्विधः	१४
वर्तमानः कालः	२०
यो॰ वशीकारवैराग्यम्	३१
वस्तुपरिच्छेदः	३०
वस्तुनिर्देशात्मकमङ्गलम्	१
वाक्यार्थज्ञानहेतुचतुष्टयम्	७०
वार्णो चतुर्विधा	२६
वानप्रस्थाश्रमः	२७
वायुप्रकृतयः पञ्च	५६
वार्द्धक्यम्	४०
वासना	२०
वासनात्रयम्	२१
वासनानन्दः	२३
विकृतपरिणामः	७
यो॰ विक्षिप्तभूमिः	३५
विक्षेपशक्तिः	४
विक्षेपः	२६
विघ्नत्वम्	२६
विजातीयभेदः	२०
विज्ञानमयकोशः	३३
वित्तैषणा	२२
विदेहमुक्तिः	८
विद्वत्संन्यासः	१०
विधिमुखप्रवृत्तिः	६८
विधिस्त्रिविधः	६६
विनाशाख्यो विकारः	३९
विपरीतभावना	६
विपरीतभावनाद्वयम्	६

	पृष्ठ
विभूतिद्वयम्	७
विराट् (वैश्वानरः)	११
विवर्तकारणम्	७२
विवर्तवादः	७२
विवित्सा	५८
विविदिषासंन्यासः	१०
विवेकः	३८
विशेषणविशेष्यभावसम्बन्धः	१५
विशेषणम्	७०
विशेषाहङ्कारः	१०
विश्वः	१२
विषयः (वेदान्तस्य)	२८-२
विषयानन्दः	२३
वृत्तिव्याप्तिः	६८
वृद्धिविकारः	३६
वेदचतुष्टयम्	२८
वेदवाक्यं द्विविधम्	६८
वेदाङ्गषट्कम्	४१
वैखरी वाक्	२६
वैदिकी (शाब्दी) प्रमा	४२
यो॰ वैराग्यम्	१०
यो॰ वैराग्यं द्विविधम्	१०
ध॰ वैश्वदेवबलिः	४१
यो॰ व्यतिरेकवैराग्यम्	३१
व्यतिरेकः	६६
व्यष्टिसूक्ष्मशरीरम्	७
व्यष्टिस्थूलशरीरम्	७
व्यष्ट्यज्ञानम् (अविद्या, व्यष्टिकारणशरीरम्, आनन्दमयकोशः)	४
व्यसनसप्तकम्	४६
व्यानो वायुः	३४
न्या॰ व्याप्तिः	२६
व्यावर्तकत्रयम्	७०
व्यावहारिकजीवः	६६
व्यावहारिकसत्ता (अज्ञातसत्ता)	१७
व्यावहारिकी प्रमा	५

(श)

	पृष्ठ
शक्तिः	४
शक्तिद्वयम् (अज्ञाने)	४
शक्तिद्वयम् (पदे)	७१
शब्दतात्पर्यम्	६८
शब्दद्वयम्	११
शब्दप्रवृत्तिनिमित्तचतुष्टयम्	२६
शब्दः	११
शब्दादिपञ्चकम्	३४
शब्दानुविद्धः समाधिः	३८
शमः	४४
शमादिषट्कम्	४४
शरीरत्रयम्	१२
शरीरम् (क्षेत्रम्)	७
शान्तात्मा	२६
शाब्दी प्रमा	४२
शाब्दी प्रमा द्विविधा	४२
शारीरस्तापः	११
शास्त्रवासना	२१
शास्त्राणि षट्	४०
शास्त्रीयद्वैतम्	६७
शास्त्रीयो बाधः	६६
ध॰ शिशुत्वम्	४०
शीलम्	५२
शीर्षण्यप्राणसप्तकम्	४६
शुद्धचैतन्यम्	४६
शुभेच्छाख्या ज्ञानभूमिः	४७
शौचम्	३५
श्रद्धा	४४-५५
श्रवणम्	१६
श्रवणादित्रयम्	१६
श्रुतार्थापत्तिः	४१
श्रुतार्थापत्तिद्वयम्	४१

(ष)

षण्ढको भिक्षुः	४४

	पृष्ठ
(स)	
सङ्कल्पादिचतुष्टयम्	२८
सजातीयभेदः	२०
सञ्चितकर्म	२५
सत्त्वापत्तिः	४८
सन्तोषः	३५
समष्टिसूक्ष्मशरीरम्	७
समष्टिस्थूलशरीरम्	७
समष्ट्यज्ञानम् (माया, समष्टि-कारणशरीरम्, आनन्दमयकोशः, सुषुप्तिः)	४
समाधानम्	४४
समाधिः	६
यो॰ समाधिद्वयम्	६
समाधिविघ्नचतुष्टयम्	२६
समाधिषट्कम्	३८
समानो वायुः	३४
सम्बन्धत्रयम् (जीवब्रह्माभेदबोधकम्)	१५
सम्बन्धः (वेदान्तस्य)	२८
सम्बन्धः शास्त्रादेर्विषयादिना	२
सम्बन्धाः	७१
यो॰ सविकल्पसमाधिः (सबीजसमाधिः, सम्प्रज्ञातयोगः)	६
सहजन्यतादात्म्यम्	२२
सहसा पतनतापः	११
सात्त्विक आहारः	१७
सात्त्विकदानम्	१६
सात्त्विकसुखम्	१६
सात्त्विको यज्ञः	१६
सात्त्विकं कर्म	१६
सात्त्विकं ज्ञानम्	१६
सात्त्विकं तपः	१६
सात्त्विकः कर्ता	१६
साधनचतुष्टयम्	२८
सामानाधिकरण्यद्वयम्	६७

	पृष्ठ
सामानाधिकरण्यम्	१५
सामान्याहङ्कारः	१०
सुखं त्रिविधम्	१६
सुप्त्यादित्रयम्	२२
सुरभिगन्धः	११
सुखम् (आनन्दः) द्विविधः	६७
सुविचारणा (विचारणा)	४७
सुषुप्तिजाग्रत्	२५
सुषुप्तित्रयम्	२५
सुषुप्तिसुषुप्तिः	२५
सुषुप्तिस्वप्नः	२५
सुषुप्त्यवस्था (सम्प्रसादावस्था)	१२–४७
सूक्ष्मप्रपञ्चः	२०
सूक्ष्मभूतानि (तन्मात्राः) पञ्च	३४
सूक्ष्मशरीरद्वयम्	७
सूक्ष्मशरीरम्	७
सूत्रषट्कम् (वैदिकम्)	४०
सृष्टिदृष्टिः	६६
सृष्टिद्वयम्	६७
सोपाधिकाध्यासः	३
संन्यासद्वयम्	१०
संन्यासः (उपरतिः)	१०–२७
संशयद्वयम्	८
संशयादित्रयम्	१६
संशयः	८
संसर्गाध्यासः	३
संसारमार्गः	१८
संसारो नवविधः	५२
स्थितप्रज्ञा	६
स्थूलप्रपञ्चः	२०
स्थूलभूतानि पञ्च	३४
स्थूलशरीरद्वयम्	७
स्थूलशरीरम्	७
स्पर्शचतुष्टयम्	३२
स्पर्शः	३२
स्वगतभेदः	२०

	पृष्ठ
स्वप्नजाग्रत्	२५-४७
स्वप्नत्रयम्	२५
स्वप्नसुषुप्तिः	२५
स्वप्नस्वप्नः	२५
स्वप्नावस्था	१२-४७
स्वरूपाध्यासः	३
स्वर्गलोकतापत्रयम् (दिव्यतापत्रयम्)	११
न्या॰ स्वार्थानुमितिः	२६
स्वाध्यायः	३५
स्वेदजम्	३०
(ह)	
यो॰ हठनिग्रहः	१०
हिरण्यगर्भः	११
हिंसा	५८
हेत्वादित्रयम् (ज्ञानादेः)	२१
हंससंन्यासी	३१

	पृष्ठ
प्रपञ्चोत्पत्तिप्रक्रिया	७३
पञ्चीकरणप्रक्रिया	७५
प्रपञ्चप्रलयप्रक्रिया	७८
मतभेदेन जीवेश्वरस्वरूपनिरूपणम्	८८
जीवब्रह्मणोर्भेदखण्डनम्	७६
अनात्मभेदखण्डनम्	८३
मतभेदेन जगदुपानप्रतिपादनम्	८६

॥ श्रीगणाधिपतये नमः ॥

॥ वेदान्तसिद्धान्तादर्शः ॥

स्थित्वा कल्पतरोरधोऽच्युतमथो ध्यायन्तमीशं परम् ।
बालेनाथ सुचारुचामरकरेणाऽऽसेवितं पृष्ठतः ।
मर्द्दानेन च गायता हरियशः संसेवितं स्वाग्रतः ।
वन्देऽहं करुणार्णवं भयहरं श्रीमद्गुरुं नानकम् ॥ १ ॥
श्रीमन्मुकुन्ददासाह्वश्रीरामसदनाह्वयोः ।
वन्दे पादौ तथा श्रीमद्रामभिक्षाह्वशास्त्रिणाम् ॥ २ ॥

क्लेशैः कर्माशयाभ्यामपि च विरहितः कर्मजन्यैर्विपाकैः ।
सत्यज्ञानस्वरूपः सुखतनुरनघो वेदमात्रैकवेद्यः ॥
भक्तानां हृद्विहारी धृततनुसगुणो नन्दगोपालसूनुः ।
आदर्शालोकदीप्ते स मनसि भवतामीश्वरः संचकास्तु ॥ १ ॥

१ अथ प्रारब्धुमिष्टस्य ग्रन्थस्य निर्विघ्नसमाप्तये मनस्यनुष्ठितं मङ्गलं शिष्यशिक्षार्थं ग्रन्थेऽप्युपनिबध्नाति–स्थित्वेत्यादिना । तत्र मङ्गलत्वं नाम समाप्तिप्रतिबन्धकीभूतदुरितविशेषविघातकत्वम् । तच्च त्रिविधम्, आशीर्वादनमस्कारवस्तुनिर्देशभेदात् । तत्र स्वस्य परस्य वा इष्टार्थशंसनम्–आशीर्वादः, स्वनिष्ठापकर्षविषयकबोधानुकूलो व्यापारो–नमस्कारः, स्वेष्टतमदेवतागुणगणोक्तिः,–वस्तुनिर्देशः, ॥

२ तत्र स्थित्वेत्याद्यश्लोकेन स्वपितृपितामहादिपरम्परायां त्रयोदशं साक्षान्नारायणावतारं कुलगुरुं श्रीमन्नानकाख्यं गुरुं नत्वा मन्त्रगुरु-परमगुरु*विद्यागुरून्क्रमशो नमस्यति–श्रीमदिति ॥

---

* वस्तुतो गुरुभ्रातुः स्वसहोदरस्यापि सतः श्रीरामसदनाह्वयस्य परमगुरुत्वेनानुवर्णनं गुरोरपि पथप्रदर्शकत्वात्सर्वथा स्वहितशासकत्वाच्च कृतं, प्रसिद्धानि चास्य महान्ति वीर्य्यवन्त्यद्भुतानि कर्माण्येतदीयजीवनचरिते ॥

बालानां सुखबोधार्थं तत्प्रसादप्रमादितः ।
कुर्वे वेदान्तसिद्धान्तादर्शमादर्शवत्स्थितम् ॥ ३ ॥
प्रायेणान्यनिबन्धेषु सदृष्टान्ता न वर्त्तते ।
वेदान्तीयपदार्थोक्तिः स्वच्छा चाल्पाक्षरान्विता ॥ ४ ॥
अतस्तेभ्योऽल्पबुद्धीनां नृणां बोधो न जायते ।
तूर्णमेवारुरुक्षूणां वेदान्तमतकोटिषु ॥ ५ ॥
बह्वर्थेऽल्पाक्षरे त्वस्मिन्सदृष्टान्तं प्रदर्शितम् ।
प्रायो वेदान्तशास्त्रस्य मेयादिक्रमशेषतः ॥ ६ ॥
बालानां सुखबोधार्थमथ चित्राण्यपि क्वचित् ।
प्रकल्प्य लिखितान्यस्मिन्पदार्थानां यथायथम् ॥ ७ ॥
तस्मान्नास्य मदुक्तस्य ग्रन्थस्यास्ति कथञ्चन ।
ग्रन्थैरन्यैर्गतार्थत्वं तेभ्यो भिन्नफलत्वतः ॥ ८ ॥
तत्र तावन्निरूप्यन्ते सञ्ज्ञाः सर्वाः समासतः ।
प्रायो वेदान्तशास्त्रस्य भिन्ना द्विचितुःक्रमात् ॥ ९ ॥

---

६ 'मेयादिकम्'-इति आदिपदादधिकारिप्रयोजनसम्बन्धा ग्राह्याः, वक्ष्यन्ते ते चाग्रे चतुर्विधसञ्ज्ञानिरूपणप्रस्तावे, अवान्तरप्रयोजनं चास्य ग्रन्थस्य बालानां सुखेन वेदान्तशास्त्रीयपदार्थावबोधः, अवान्तरमेयं च यथायथं सञ्ज्ञादि, सम्बन्धश्च प्रमेयादिना प्रतिपाद्यप्रतिपादकभावादिरित्यवगन्तव्यम् । यद्यपि वेदान्तसञ्ज्ञानिबन्धे वेदान्तसञ्ज्ञा अपि यथायथं प्रतिपादिता एवोपनिबद्धाश्च ताः समासतः केनचिद्विदुषाऽऽधुनिकेन,* तथापि तासामपूर्णत्वात्तत्तल्लक्षणस्य तत्रानभिहितत्वाच्चाधिकसञ्ज्ञासञ्ज्ञेयलक्षणाद्यभिधायिनो नास्य ग्रन्थस्य तैर्नैरर्थक्यमित्यनुसन्धेयम् ॥

* आदित्यपुरोपपदवाच्येन ॥

सञ्ज्ञासञ्ज्ञेयरूपाभ्यां शून्यत्वेपि चिदात्मनः ।
अध्यारोपेण सर्वस्य युक्तं तस्मिन्निरूपणम् ॥ १० ॥
अध्यारोपस्त्ववस्मिन् स्यात्कल्पनं तस्य वस्तुनः ।
शुक्तिकाशकले यद्वद्रूप्यादीनां प्रकल्पनम् ॥ ११ ॥

---

१० अध्यारोपो नाम—वस्तुन्यवस्त्वारोपः, यथा शुक्तिकाशकलादौ-रजतादेः, प्रकृते वस्तु चिदात्मा, तत्रावस्तुनः प्रपञ्चस्यारोपोध्यारोपः। अयमेवाध्यासो विभ्रमो विपर्य्ययश्चेत्युच्यते, लक्षणान्तराणि च तस्य परत्र पूर्वदृष्टावभासः* एकावच्छेदेन स्वसंसृज्यमाने स्वात्यन्ताभाववत्यवभासः† इत्यादीनि बोद्धव्यानि । स च द्विविधो ज्ञानाध्यासोऽर्थाध्यासश्च, तत्रातस्मिँस्तद्बुद्धिर्ज्ञानाध्यासो यथा शुक्तौ रजतबुद्धिर्यथा वाऽऽत्मन्यनात्मबुद्धिः; प्रमाणाजन्यज्ञानविषयत्वे सति पूर्वदृष्टसजातीयोऽर्थाध्यासो यथा शुक्तौ रजताध्यास आत्मनि चानात्माध्यासः। यद्वा, स्वरूपाध्यासः संसर्गाध्यासश्चेति द्विविधोऽध्यासः । तत्राद्यो रज्ज्वादौ भुजङ्गाद्यध्यास आत्मनि वाऽनात्माध्यासो द्वितीयस्तु स्फटिके लौहित्यस्य शङ्खे च पीतिम्नोऽनात्मनि चात्मतद्धर्मादेः, आत्मादेः पारमार्थिकत्वेन स्वरूपतोऽध्यासाभावात् । अथवा, प्रकारान्तरेण सोपाधिको निरुपाधिकश्चेति भेदादध्यासो द्विविधः। तत्रोपाधिनिरूपणाधीननिरूपण आद्यः, द्वितीयस्तु तन्निरूपणानधीननिरूपणः । द्विविधोप्यसौ बाह्याभ्यन्तरभेदात्पुनर्द्विविधः । तत्र लौहितस्फटिकादिर्बाह्यः सोपाधिको भ्रमः, जवाकुसुमादेरुपाधित्वात्; कर्तृत्वादिभ्रम आन्तरः, कर्मरूपेण परिणताऽविद्यारूपोपाधिकार्य्यत्वात्; शुक्तिरूप्यादिस्तु बाह्यो निरुपाधिको भ्रमः; आकाशादिभ्रमोपि बाह्यो निरुपाधिकः ॥

---

* अवभासते इत्यवभास इति व्युत्पत्त्याऽवभासशब्दोऽर्थाध्यासपरः, अवभासतेऽर्थः (रजतादिः) अनेनेति व्युत्पत्त्या च ज्ञानाध्यासपरः ।

† स्वात्यन्ताभाववत्यवभास एतावन्मात्रोक्तौ यत्र भूतलादौ घटोऽपसारितः पुनश्चानीतस्तादृशघटादावतिप्रसङ्गः स्यादिति स्वसंसृज्यमान इत्युक्तम्, एवमपि मूलावच्छेदेन कपि संयोगात्यन्ताभाववति वृक्षे शाखाग्रावच्छेदेन च तत्संसृज्यमानेऽवभासमानत्वात्संयोगस्य तत्रातिप्रसङ्गः स्यादित्यत एकावच्छेदेनेत्युक्तम् ।

अध्यारोपस्य तस्याऽस्य चाऽज्ञानं हेतुरीरितम् ।
समष्टिव्यष्टिभेदेन तद्द्विधा परिभाष्यते ॥ १२ ॥
विक्षेपावरणाख्ये द्वे शक्ती स्तस्तस्य चैव हि ।
आवृणोत्यन्यया ऽऽत्मानं वैविध्यं यात्यथाद्यया ॥ १३ ॥
द्विधाप्यावरणं प्रोक्तमभानावरणं तथा ।
असदावरणं, हेतुरसत्त्वाभानयोर्द्वयोः ॥ १४ ॥

---

१२ अज्ञानम्—अनादिभावरूपत्वे सति विज्ञाननिरास्यं, वा जगदुपादानत्वे सति सदसद्भ्या*मनिर्वचनीयं, वा विस्पष्टं भासमानत्वे सत्यनाद्यनिर्वाच्यं, साक्षाज्ज्ञाननिरास्यं वा । इदमेव जगतो मूलकारणं सत्त्वरजस्तमोगुणानां साम्यावस्थारूपत्वाच्च मूलप्रकृतिः, प्रलयावस्था, अव्यक्तमव्याकृतं, ज्ञानेन विना न क्षरतीत्यक्षरम्, अविद्या, तम इति च व्यवह्रियते । तदेवाज्ञानं वनवदेकबुद्धिविषयत्वात्समष्टिः, प्रत्येकवृक्षवदनेकबुद्धिविषयत्वाच्च व्यष्टिरिति व्यवह्रियते, एवमग्रेऽपि व्यष्टिसमष्ट्योर्विभागोऽनुसन्धेयः । समष्ट्यज्ञानमीश्वरोपाधिर्विशुद्धसत्त्वप्रधानत्वान्माया, ऽखिलकारणत्वात्समष्टिकारणशरीरम्, आनन्दप्रचुरत्वात्कोशवदखण्डात्मन आच्छादकत्वाच्चानन्दमयः कोशः, सर्वोपरमत्वात्सुषुप्तिरिति चोच्यते । व्यष्ट्यज्ञानं जीवोपाधिर्मलिनसत्त्वप्रधानत्वादविद्या, अहङ्कारादिकारणत्वाद्व्यष्टिकारणशरीरम्, आनन्दप्रचुरत्वात्कोशवत्प्रत्यक्चेतनस्याच्छादकत्वाच्चानन्दमयः कोशः, सर्वस्वसृष्टव्यष्टिप्रपञ्चोपरमत्वात् सुषुप्तिश्चोच्यते ॥

१३ शक्तिः—कार्यजननानुकूलं कारणनिष्ठं सामर्थ्यम्, आवरणशक्तिः—स्वाश्रयात्माद्यावरणानुकूलमज्ञाननिष्ठं सामर्थ्यम्, आकाशादिविविधकार्यजननानुकूलमज्ञानसामर्थ्यं विक्षेपशक्तिः ॥

१४ अभानावरणम्, (कूटस्थो) न भातीत्याकारकाभानापादनप्रयोजकी

---

* सदसद्भ्यामित्युपलक्षणं, सत्त्वेनासत्त्वेन सदसदुभयत्वेन ब्रह्मणो भिन्नत्वेनाऽभिन्नत्वेन भिन्नाऽभिन्नोभयत्वेन सावयवत्वेन निरवयवत्वेन सावयवनिरवयवोभयत्वेन चेति न वधाऽप्यनिर्वाच्यमित्यर्थः ॥

तन्निवृत्तिकरं ज्ञानं तथा द्वेधा समीरितम् ।
परोक्षं चापरोक्षं च जीवब्रह्मैक्यभावकम् ॥ १५ ॥
अस्ति ब्रह्मेति यज् ज्ञानं तत्परोक्षं प्रकीर्त्यते ।
तथाऽपरोक्षविज्ञानमहं ब्रह्मेति गीयते ॥ १६ ॥
परोक्षज्ञानतो नश्येदसदावरणं त्विदम् ।
अपरोक्षार्थविज्ञानादभानावरणं तथा ॥ १७ ॥
वृत्तिज्ञानस्य जन्यस्य द्विधा भेदोऽयमीरितः ।
तथाऽजन्यं तु विज्ञानं स्याच्छुद्धब्रह्मरूपकम् ॥ १८ ॥
जन्याऽजन्यत्वभेदाभ्यामेवं सामान्यतो द्विधा ।
ज्ञानं स्यादादिमं द्वेधा प्रमा चैवाऽप्रमेति च ॥ १९ ॥
प्रमाऽपि द्विविधा तत्र जीवेश्वरविभेदतः ।
वक्ष्यते षड्विधाऽऽद्या तु मायावृत्तिस्तथापरा ॥ २० ॥
जीवाश्रयापि तत्राद्या प्रमा स्याद्व्यावहारिकी ।
पारमार्थिकयथाप्येवंभेदाद्द्वेधाऽर्थभेदतः ॥ २१ ॥

भूतमावरणम्, (कूटस्थः) नास्तीत्यसत्त्वापादनप्रयोजकीभूतमावरणमसदावरणम् ॥

१५ अनधिगताबाधितवर्तमानयोग्य*विषयचैतन्याभिन्नं प्रमाणचैतन्यमपरोक्षज्ञानं (=प्रत्यक्षप्रमा), निरुक्तविषयचैतन्यभिन्नं प्रमाणचैतन्यं परोक्षज्ञानमित्युच्यते ॥

१९ प्रमाऽप्रमादीनां यावद्वृत्तिभेदानां लक्षणानि तु सञ्ज्ञादर्शावसाने स्वयमेव मूले वक्ष्यन्ते ।

२० जीवेश्वरविभेदतो जीवाश्रयेश्वराश्रया चेति द्विधा प्रमेत्यर्थः ।

---

* अधिगतार्थविषयकयथार्थस्मृतावतिप्रसङ्गवारणार्थम् अनधिगतेति विषयविशेषणं, भ्रमज्ञानेऽतिप्रसङ्गवारणार्थमबाधितेति, धर्माधर्मयोः प्रत्यक्षवारणाय योग्येति च विषयविशेषणम् ।

चराचरः प्रपञ्चोऽयं सूक्ष्मस्थूलोभयात्मकः ।
शक्तेर्विक्षेपनाम्न्याः स्यात्कार्य्यभूतो ह्यशेषतः ॥ २२ ॥

असङ्ख्यातोऽप्ययं तत्तद्व्यक्त्याऽथापि समासतः ।
बाह्याभ्यन्तरभेदेन सङ्कलय्य द्विधा भवेत् ॥ २३ ॥

प्रकृतेः परिणामः स्यात्सृष्टौ रामानुजे मते ।
ब्रह्मणः परिणामस्तु विष्णुस्वामिमते तथा ॥ २४ ॥

---

२२ एवम् आवरणशक्तिप्रसङ्गायातं निरूप्येदानीं विक्षेपशक्तेः कार्य्यं निरूपयति—चराचरइति ।

२३ बाह्यत्वमाभ्यन्तरत्वं च शरीरापेक्षया ग्राह्यम् ॥

२४ रामानुज—विष्णुस्वामि—मध्व—निम्बार्क—यादव—भास्कर—नीलकण्ठादीनामपि वैदान्तिकत्वेन वेदान्तादर्शेऽस्मिँस्तेषामपि मतस्योपन्यसितुमुचितत्वात्तदीयं मतमुपन्यस्यति—प्रकृतेरित्यादिना । यद्यपि यादव-भास्करनैलकण्ठानि मतान्यप्रचलितप्रचारतया माधवाचार्य्येणोपेक्षितानि तथाप्यत्युद्भटतया रामानुजाचार्य्यैर्वेदार्थसङ्ग्रहे आकलितान्येवेति तान्यप्यनुपेक्षणीयानीति बोध्यं; तत्र बौधायनमतानुयायिनो रामानुजाचार्या विशिष्टाद्वैत*वादिनः, माध्वा भेदवादिनः, निम्बार्का भेदाऽभेदवादिनः (कार्य्यात्मना भेदः कारणात्मना चाऽभेदः), विष्णुस्वामिनः शुद्धाद्वैतवादिनः, वल्लभाचार्य्या अपि एतन्मतानुयायिनः, यन्मतमिदानीं वाल्लभमतं प्रसिद्धम्, एते एव चत्वारः सम्प्रदाया उच्यन्ते । तत्र परिणामवादश्चतुर्णामेव ज्ञेयः, परञ्चैतावान्भेदः—रामानुजमते प्रकृतेः परिणामो जगद् विष्णुस्वामिमते तु ब्रह्मण इति ।

---

* विशिष्टं च (व्याकृतनामरूपविशिष्टं चिदचित्) विशिष्टं च (अव्याकृतनामरूपविशिष्टं चिदचित्) विशिष्टे, तयोरद्वैतमित्यर्थः ।

विकृतोऽविकृतश्चैव परिणामो द्विधा मतः ।
आद्यो दध्यादि दुग्धादेर्द्वितीयो ब्रह्मणो जगत् ॥ २५ ॥
विभूतिर्द्विविधा प्रोक्ता नित्याऽनित्यत्वभेदतः ।
अधऊर्द्ध्वपरिच्छिन्ना श्रीरामानुजदर्शने ॥ २६ ॥
सृष्टेरन्तर्गतो देहः सूक्ष्मस्थूलोभयात्मकः ।
समष्टिव्यष्टिभेदेन द्विधा स्याच्छाङ्करे मते ॥ २७ ॥
एतत्सङ्गाभिमानेन याति ब्रह्मैव जीवताम् ।
ज्ञात्वाऽसङ्गत्वमेवाथ कैवल्यं प्रतिपद्यते ॥ २८ ॥
कैवल्यं तद् द्विधा तद्वत्कीर्तितं वेदवित्तमैः ।
निवृत्तिः सर्वदुःखानां प्राप्तिः स्वात्मसुखस्य च ॥ २९ ॥

---

२५ ननु ब्रह्मणोऽविकृतत्वेन तदीयः परिणामः कथं स्यादित्याशङ्कायां सुवर्णादेः कुण्डलादिवदविकृतं परिणाममभ्युपगन्तुं विष्णुस्वामिमतेन प्रथमतः परिणामं विभजते-विकृत इति ।

२६ "पादोऽस्य सर्वा भूतानि त्रिपादस्याऽमृतं दिवि"-इति श्रुतेः एकपाद्विभूतिः (=संसारः) अनित्यविभूतिरियमेव लीलाविभूतिरित्याख्यायते, त्रिपाद्विभूतिश्च नित्यविभूतिरित्याख्यायते, तत्र नित्यविभूतिरधःपरिच्छिन्ना अनित्यविभूतिश्चोर्द्ध्वपरिच्छिन्ना इत्यर्थः ।

२७ देहः-सुखदुःखान्यतरसाक्षात्काररूपभोगायतनं शरीरम् । स्थूलदेहः-पञ्चीकृत*भूतकार्य्यो दृग्गोचरो वा देहः, स च समष्टिव्यष्टिभेदेन द्विविधः । सूक्ष्मदेहः-अपञ्चीकृतपञ्चभूतकार्य्यो दृग्गोचरो वा कारणदेहभिन्नो देहः, सोऽपि समष्टिव्यष्टिभेदेन द्विविध इत्यर्थः ॥

२९ कैवल्यम्-विद्यया निरस्ताऽविद्यातत्कार्य्यब्रह्मभावापत्तिर्निःश्रेयसम्, मोक्षः, मुक्तिरिति चाख्यायते, तस्य वस्तुत एकत्वेऽपि दुःखानन्दरूपप्रतियोगिद्वैविध्याद्वैविध्यमुक्तम् । यद्वा, जीवन्मुक्तिर्विदेहमुक्तिश्चेतिभेदाद्नु-

---

* पञ्चीकरणप्रकारो द्वितीयादर्शे वक्ष्यते ।

रामानुजादिसिद्धान्ते त्वेवं तद्द्विविधं भवेत् ।
स्वात्मप्राप्त्यात्मकं चैव परात्मप्राप्तिलक्षणम् ॥ ३० ॥
दृग्दृश्यौ द्वौ पदार्थौ स्तः कीर्तितौ शाङ्करे मते ।
चैतन्यं दृक् तथा तस्य दृश्यमेतज्जगद्भवेत् ॥ ३१ ॥
ब्रह्माऽविद्या तथा तूक्ताऽविद्याऽविद्या द्विधा मता ।
प्रत्यक्षं स्याद्द्विधा जीवसाक्षि चेश्वरसाक्ष्यथ ॥ ३२ ॥
स्वात्माऽसङ्गत्वबोधो हि संशयादिविवर्जितः ।
यावन्न जायते तावत्कोदाशा नच कीदृशी ॥ ३३ ॥
संशयोऽपि द्विधा प्रोक्तो मानगो मेयगस्तथा ।
तथाऽसम्भावना चाथ विपरीता च भावना ॥ ३४ ॥

क्तिर्द्विविधा । तत्र तत्त्वज्ञानिनो भोगेन प्रारब्धकर्मक्षये वर्तमानशरीरपातो भाविशरीराऽनारम्भो वा—विदेहमुक्तिः, श्रवणादिभिरुत्पन्नसाक्षात्कारस्य विद्वत्संन्यासिनः कर्तृत्वाद्यखिलबन्धप्रतिभासनिवृत्तिर्जीवन्मुक्तिः ॥

३२ जीवसाक्षीश्वरसाक्षीत्यत्र साक्षिशब्दो लक्षणया तज्जन्यज्ञानाभिप्रायो द्रष्टव्यस्तथा च यन्मतेऽन्तःकरणावच्छिन्नं चैतन्यं जीवस्तन्मतेन्तःकरणोपहितचैतन्यरूपजीवसाक्षिजन्यं प्रत्यक्षं जीवसाक्षि, तथा मायाविशिष्टं चैतन्यमीश्वरस्तत्साक्षी तु मायोपहितं चैतन्यं, तज्जन्यं ज्ञानमीश्वरसाक्षिप्रत्यक्षमिति निष्पन्नम् ।

३४ संशयः—एकस्मिन्धर्मिणि विरुद्धकोटिद्वयावगाहिज्ञानम्, एकत्र भासमानविरुद्धनानाकोटिकज्ञानं वा । मानगः=वेदाः ब्रह्मणि प्रमाणं न वा इति वेदात्मकप्रमाणगतसंशयः । मेयगः =ब्रह्माद्वयं सद्वयं वा ब्रह्म जगत्कारणं न वा इत्यादिरूपो ब्रह्मात्मकप्रमेयगतः संशयः । बलवन्निषेधकोटिकः संशयोऽसम्भावना, सापि प्रमाणगतप्रमेयगतभेदेन द्विविधा । तत्र ब्रह्मणो घटादिवत्सिद्धत्वेन मानान्तरगम्यत्वाच्छ्रुतिस्तत्प्रतिपादिका कथं भवेत् ? फलाभावाच्च भवेदेव—इत्याकारिका चित्तवृत्तिः ब्रह्म

संशयादिकराहित्यसाहित्याभ्यां द्विधा भवेत् ।
प्रज्ञापि सुस्थिरैकाथ द्वितीया त्वस्थिराऽभिधा ॥ ३५ ॥
स्थैर्य्यात्कर्षापकर्षाभ्यां प्रज्ञायाश्च द्विधा मतः ।
समाधिः सविकल्पाख्यो निर्विकल्पाह्वयस्तथा ॥ ३६ ॥

प्रमाकरणश्रुतिलक्षणप्रमाणगताऽसम्भावना । ब्रह्मणस्सच्चिदानन्दरूपिणो-ऽनृतजडदुःखात्मकप्रपञ्चविलक्षणत्वेन तत्कारणत्वं कथं भवेत्? न भवे-द्वेत्याकारिका चित्तवृत्तिश्च ब्रह्मात्मकप्रमेयगताऽसम्भावना । एवं लोके-पि प्रमाणप्रमेययोरसम्भावनाकारो द्रष्टव्यः । विपरीता भावना त्वतस्मिं-स्तद्बुद्धिः, साच पूर्वं ज्ञानाध्यासशब्देनोदीरिता । सापि, तथा=प्रमाणगता प्रमेयगता चेति द्विविधा । तत्र श्रुतीनामहेयानुपादेयब्रह्मप्रतिपादकत्वे नि-ष्फलत्वप्रसङ्गाच्छ्रुतयः कर्मपरा एवेति निश्चयात्मिका चित्तवृत्तिः प्रमाण-गतविपरीतभावना । "योग्यं योग्येन सम्बद्ध्यते"–इति न्यायात्त्रिगुणात्म-कप्रपञ्चोपादानं त्रिगुणात्मिका मायैव न ब्रह्मेति निश्चयात्मिका चित्त-वृत्तिर्ब्रह्मात्मकप्रमेयगतविपरीतभावना । एवं लोकेपि विपरीतभावनाऽ-नुसन्धेया ॥

३५ संशयादीति, संशयाऽसम्भावनाविपरीतभावनाराहित्येन सुस्थिरा प्रज्ञा (=स्थितप्रज्ञा,) तत्साहित्येन तु अस्थिरा (=अस्थितप्रज्ञा,) इति क्रमोऽनुसन्धेयः ॥

३६ समाधिः–द्रष्टृस्वरूपावस्थानहेतुश्चित्तवृत्तिनिरोधः, अयमेव योग-इत्युच्यते, स च द्विविधः,–सविकल्पो निर्विकल्पश्चेति । तत्र ज्ञातृज्ञान-ज्ञेयविकल्पावभासपुरस्सरमात्मनि चित्तसमाधानं सविकल्पः समाधिः, अय-मेव च सबीजसंप्रज्ञातशब्दाभ्यामपि व्यवह्रियते । ज्ञातृज्ञानज्ञेयविकल्पा-नवभासपुरस्सरमात्मनि चित्तसमाधानं च निर्विकल्पो, निर्बीजो, ऽसंप्रज्ञा-तश्चेत्याख्यायते ॥

विद्वद्विविदिषाभेदात्संन्यासो द्विविधो भवेत् ।
जातरूपकमण्डल्वोर्धार्य्याद्योपि द्विधा मतः ॥ ३७ ॥
तथा तद्धेतुभूतं स्याद्वैराग्यं सर्ववस्तुषु ।
परञ्चापरमित्येवं भेदात्तद्द्विविधं भवेत् ॥ ३८ ॥
वैराग्याभ्यासयोगाभ्यां क्रियमाणश्च योगिभिः ।
निग्रहो द्विविधः प्रोक्तस्तत्राद्यो हठनिग्रहः ॥ ३९ ॥
द्वितीयो योगिभिः प्रोक्तः क्रमनिग्रहनामकः ।
सामान्योऽथ विशेषश्च द्विधाऽहङ्कार उच्यते ॥ ४० ॥

---

३७ संन्यासः—विहितानां कर्मणां विधिना परित्यागः । गृहस्थाश्रमादौ कृतश्रवणादिभिरुत्पन्नसाक्षात्कारेण गृहस्थादिना चित्तविश्रान्तिलक्षणां जीवन्मुक्तिमुद्दिश्य क्रियमाणः संन्यासो विद्वत्संन्यासः, विवेकादिसाधनसम्पन्नेन तत्त्वज्ञानमुद्दिश्य क्रियमाणः संन्यासो विविदिषासंन्यासः । विद्वत्संन्यासोऽपि जातरूपधरो दण्डकमण्डल्वादिधारणरूपश्चेति द्विविधः, तत्राद्यः—औत्पत्तिकं रूपमपरित्यज्य जन्मापादककर्मत्यागः, अन्त्यस्तु—प्रैषोच्चारणपूर्वकं दण्डाद्यादाय शिखासूत्रादित्यागः ॥

३८ तद्धेतुभूतम्=संन्यासकारणीभूतमित्यर्थः । तदुक्तं "यदा मनसि वैराग्यं जायते सर्ववस्तुषु । तदैव संन्यसेद्विद्वानन्यथा पतितो भवेद्"—इति । वैराग्यं—विषयवैतृष्ण्यम् । अपरवैराग्यं—ब्रह्मज्ञानान्यविषयवैतृष्ण्यम्, तच्च यतमानादिसञ्ज्ञया चतुर्विधमग्रे वक्ष्यते । परवैराग्यम्—ब्रह्मज्ञानसाधारणविषयेषु (त्रिगुणत्वादिदोषदर्शनात्) वैतृष्ण्यमिति विभागः ॥

३९ निग्रहः—इन्द्रियाणां विषयेभ्यो निग्रहणम्, अयमेव निरोधः प्रत्याहारश्चेत्युच्यते ॥

४० अहङ्कारः—अभिमानात्मिका चित्तवृत्तिः । सामान्यतोऽहमित्यभिमानात्मिका चित्तवृत्तिः—सामान्याहङ्कारः, ब्राह्मणोऽहं क्षत्रियोऽहमित्याद्यभिमानात्मिका चित्तवृत्तिः—विशेषाहङ्कारः ॥

सौरभाऽसौरभत्वाभ्यां भिन्नो गन्धो द्विधा भवेत् ।
शब्दो वर्णात्मकश्चाथ ध्वन्यात्मेति द्विधा मतः ॥ ४१ ॥
शारीरो मानसश्चेति भेदादाध्यात्मिको द्विधा ।
(३) तापः स्याद्भुवि, दिव्यश्च त्रिधा तापः समीरितः ॥ ४२ ॥
क्षयस्यातिशयस्याथ तापश्च सहसा च्युतेः ।
स्वर्गेष्वेभिस्त्रिभिस्तापैः पीड्यन्तेऽदितिनन्दनाः ॥ ४३ ॥
समाधेयं समाधिस्थैः समाधौ ब्रह्म तद्भवेत् ।
विराड् हिरण्यगर्भश्चेशश्चेत्येवं त्रयीतनु ॥ ४४ ॥

---

४१ गन्धः—घ्राणग्राह्यो गुणः । अनुकूलवेदनीयो गन्धः—सौरभम्, प्रतिकूलवेदनीयो गन्धः—असौरभम् । यद्यपि सौरभासौरभादिकाः सञ्ज्ञाः सर्वतन्त्रसिद्धान्तसिद्धत्वान्न वेदान्तस्याऽसाधारण्यस्तथापि प्राचीनैर्वेदान्तसञ्ज्ञानिबन्धे निबद्धत्वादिहाप्युपन्यस्ताः, वेदान्तसञ्ज्ञानिरूपणप्रकरणे तासामुपन्यासस्य हेतुं तु त एवाचार्य्या विन्दन्तामिति न वयं पर्य्यनुयोगार्हाः ।

४२ तापः—प्रतिकूलवेदनीयः, स चाऽऽध्यात्मिकाधिभौतिकाधिदैविकभेदेन त्रिधा वक्ष्यते, तत्राऽऽध्यात्मिकस्तापो द्विविधः—शारीरो मानसश्चेति । वातपित्तश्लेष्मणां वैषम्यनिबन्धनो ज्वरादिराद्यः, परकर्तृकापकारादिनिबन्धनः क्रोधादिर्द्वितीयः ॥

४३ पुण्यकर्मक्षये पतनभीतिजन्यस्तापः—क्षयतापः, स्वाधिकृततरदेवतोत्कर्षदर्शने जायमानस्तापोऽतिशयतापः, पुण्यकर्मक्षये मुद्गरादिप्रहरणजन्यस्तापः सहसा च्युतेस्तापः (सहसा पतनताप इति यावत्) ॥

४४ ब्रह्मेति, जगदुत्पत्तिस्थितिलयकारणत्वं ब्रह्मणस्तटस्थलक्षणं सत्यज्ञानानन्दाः स्वरूपलक्षणम् । समष्टि*स्थूलसूक्ष्मकारणशरीरोपहितं चैतन्यं (= ब्रह्म) विराट्, समष्टि*सूक्ष्मकारणशरीरोपहितं चैतन्यं हिरण्यगर्भः, समष्टिकारणशरीरोपहितं चैतन्यमीशः ॥

---

* समष्टिपदं प्रत्येकेन स्थूलशरीरादिना सम्बन्धनीयम् ।

तन्नियम्यस्तथा जीवः शरीरत्रयसंयुतः ।
प्राज्ञतैजसविश्वाख्यभेदात्स्यात्त्रिविधो मतः ॥ ४५ ॥

तथा यत्तदधिष्ठेयं शरीरं तत्त्रिधोच्यते ।
स्थूलं सूक्ष्मं तथैवाथ कारणं चेति भेदतः ॥ ४६ ॥

जाग्रत्स्वप्नसुषुप्त्याख्यास्तिस्त्रोऽवस्थाश्च देहिनः ।
मनोवाक्कायभेदाच्च त्रैविध्यं करणं व्रजेत् ॥ ४७ ॥

---

४५ जीवः—अविद्योपहितं वाऽविद्यावच्छिन्नं वाऽविद्याप्रतिबिम्बितं वा चैतन्यम् । यद्वा, अन्तःकरणोपहितं वाऽन्तःकरणावच्छिन्नं वाऽन्तःकरणप्रतिबिम्बितं वा चैतन्यं जीवः । शरीरत्रयसंयुतः = व्यष्टिस्थूलसूक्ष्मकारणशरीरत्रयोपहितः, तत्र व्यष्टिस्थूलसूक्ष्मकारणशरीरत्रयोपहितं चैतन्यं विश्वः, व्यष्टिसूक्ष्मकारणशरीरद्वयोपहितं चैतन्यं तैजसः, व्यष्टिकारणशरीरमात्रोपहितं चैतन्यं प्राज्ञ इति विवेकः ॥

४६ शरीरत्वं—भोगायतनत्वं, तच्च पूर्वं व्याख्यातमेव । एतदेव त्रिविधं शरीरं क्षेत्रवत्कर्मावपनस्थानत्वात्क्षेत्रमिति परिभाष्यते शरीरी च क्षेत्रज्ञः ॥

४७ जाग्रदवस्था—दिगाद्यधिष्ठातृदेवतानुगृहीतैरिन्द्रियैः शब्दादिविषयानुभवावस्था, जाग्रद्भोगप्रदकर्मोपरमे सति इन्द्रियोपरमे जाग्रदनुभवजन्यसंस्कारोद्भूतविषयतज्ज्ञानावस्था—स्वप्नः, जाग्रत्स्वप्नोभयभोगप्रदकर्मोपरमे सति द्विविधदेहा*भिमाननिवृत्तिद्वारा विशेषविज्ञानोपरमात्मिकाया बुद्धेः कारणात्मनावस्थितिः—सुषुप्तिः । केचित्तु मूर्च्छामरणसमाधीनपि सङ्कलय्यावस्थापट्कं वदन्ति, तत्र मुद्गरादिप्रहरणानन्तरं विशेषविज्ञानोपरमावस्था—मूर्च्छावस्था, चरमशरीरप्राणसंयोगध्वंसः—मरणावस्था, समाधिस्तूक्त एव । करणत्वम्—क्रियानिष्पादकत्वम् । कायः=देहव्यापि त्वगिन्द्रियम् । मनआदेर्लक्षणमग्रे वक्ष्यते ॥

---

* द्विविधदेहशब्देन स्थूलसूक्ष्मौ देहौ ग्राह्यौ ।

तन्निष्पाद्यं तथा कर्म पुण्यपापविमिश्रितम् ।
स्यात्त्रिधा, त्रिविधं तत्र पुण्यं कर्म प्रकीर्तितम् ॥ ४८ ॥
उत्कृष्टं मध्यमं पुण्यं पुण्यं सामान्यमेव च ।
एवमेव त्रिधा प्रोक्ते पापमिश्रितकर्मणी ॥ ४९ ॥
विपाकारम्भि यत्कर्म तत्प्रारब्धमुदीरितम् ।
इच्छाऽनिच्छापरेच्छानां भेदात्तत्त्रिविधं भवेत् ॥ ५० ॥
तन्निष्पन्नस्तथा ज्ञाने प्रतिबन्धस्त्रिधा मतः ।
भूतो भावी तथा वर्तमानश्चेति प्रभेदतः ॥ ५१ ॥

---

४८ कर्म—शुभाऽशुभक्रियाजन्योऽदृष्टः । वेदविहितक्रियाजन्यं पुण्यं कर्म, धर्म इति चाख्यायते । वेदप्रतिषिद्धक्रियाजन्यं पापं कर्म, अधर्म इति चोच्यते । उभयात्मकं कर्म मिथः सङ्कीर्णं मिश्रितमिति निगद्यते ॥

४९ हिरण्यगर्भशरीरप्रापकम्—उत्कृष्टं पुण्यम्, इन्द्रादिशरीरप्रापकं—मध्यमं पुण्यम्, यक्षरक्षआदिशरीरापादकं—सामान्यं पुण्यम् । तथोत्कृष्टपापम्—परतापकगुच्छगुल्मवृश्चिकादिशरीरप्रापकम्, आम्रपनसादिशरीरापादकं—मध्यमं पापम्, लोकेज्य गोगजाश्वत्थतुलस्यादिशरीरापादकं—सामान्यं पापम् । एवं निष्कामकर्मानुष्ठानादियोग्यशरीरप्रापकं कर्मोत्कृष्टमिश्रितम्, स्वाश्रमोचितकाम्यकर्मानुष्ठानादियोग्यशरीरप्रापकं मध्यममिश्रितम्, चाण्डालव्याधाद्यधमशरीरप्रापकं सामान्यमिश्रितम् ॥

५० योगिना स्वेच्छाकृतं भिक्षाऽन्नादि—इच्छाप्रारब्धम्, समाध्यवसरे शिष्यादिभिर्दीयमानमन्नादि—परेच्छाप्रारब्धम्, अकस्माज्जायमानं कण्टकवेधादि—अनिच्छाप्रारब्धम् ॥

५१ तन्निष्पन्नः=प्रारब्धापादितः । प्रतिबन्धः—कार्य्यानुकूलकिञ्चिद्धर्मविघटकः, यथाग्नौ दाहरूपकार्य्यानुकूलस्य कस्यचिद्धर्मस्य शक्त्याख्यस्य विघटको मणिमन्त्रौषधादिः, प्रकृते च कार्य्यं ज्ञानं, तदनुकूलो धर्मः श्रवणमननादिषु योग्यत्वं, तद्विघटकत्वं भवति भूतप्रतिबन्धादेरिति लक्ष्ये

प्रमाद्यैः श्रवणाद्यैश्च प्रतिबन्धे त्वपाकृते ।
ज्ञानमुत्पद्यते पुंसां तत्त्वमस्यादिवाक्यतः ॥ ५२ ॥
वाक्यात्तस्मादखण्डार्थबोधो लक्षणया भवेत् ।
सम्बन्धत्रयसंयुक्तात्पदार्थप्रत्यगात्मनाम् ॥ ५३ ॥

लक्षणसमन्वयः । भूतप्रतिबन्धः–पूर्वानुभूतविषयस्यावशेन पुनः पुनः स्मरणम्, भाविप्रतिबन्धो द्विविधः–प्रारब्धशेषो * ब्रह्मलोकेच्छा चेति, वर्तमानः प्रतिबन्धस्तु विषयासक्तिः, प्रज्ञामान्द्यं, कुतर्कः, विपर्य्ययदुराग्रहश्चेति चतुर्विधः ॥

५२ ज्ञानम्–जीवब्रह्मणोरभेदनिश्चयः ॥

५३ अखण्डार्थत्वम्–सजातीयविजातीयस्वगतभेदशून्यार्थत्वं, यद्वा, अपर्य्यायानेकशब्दप्रकाश्यत्वे सत्यविशिष्टत्वम् †, अथवा, तत्प्रातिपदिकार्थत्वम् ‡ । लक्षणया=भागत्यागलक्षणया । तथा हि–शक्यसम्बन्धो हि-लक्षणा । सा द्विविधा, केवललक्षणा, लक्षितलक्षणा चेति । तत्र शक्यपरम्परासम्बन्धो लक्षितलक्षणा यथा द्विरेफो रौतीति वाक्ये द्विरेफपदस्य मधुकरे तस्य च भ्रमरे । शक्यसाक्षात्सम्बन्धः केवललक्षणा, सा च त्रिविधा–जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति । शक्यमात्रपरित्यागेन तत्सम्बन्ध्यर्थान्तरे वृत्तिर्जहल्लक्षणा, यथा गङ्गायां घोष इति गङ्गापदस्य तीरे, शक्यार्थापरित्यागेन तत्सम्बन्ध्यर्थान्तरे वृत्तिरजहल्लक्षणा, यथा शोणो धावतीत्यत्र शोणपदस्य शोणगुणविशिष्टेऽश्वादिद्रव्ये । शक्यैकदेशपरित्यागेनैकदेशे वृत्तिर्जहदजहल्लक्षणा–इयमेव भा-

* प्रारब्धं कर्म द्विविधं, फलाभिसन्धिकृतं केवलं चेति । तत्र फलाभिसन्धिकृतं फलं दत्त्वैव नश्यति, तदेव चात्र ज्ञानप्रतिबन्धकत्वेन ग्राह्यम् । केवलं प्रारब्धं तु पापनिवृत्तिद्वारा ज्ञानोत्पत्तौ हेतुरेव ॥

† अपर्यायभूता ये अनेके शब्दाः सत्यज्ञानानन्दादयस्तत्प्रकाश्यत्वे सतीत्यर्थः । नीलो-घट इत्याद्यपर्यायानेकशब्दप्रकाश्ये तादात्म्येन नीलविशिष्टे घटाद्यर्थेऽतिप्रसङ्गवारणार्थमविशिष्टत्वदलम्, तथा घटः कलशः कुम्भ इत्यादिपर्यायाऽनेकशब्दप्रकाश्येऽविशिष्टे घटादावतिप्रसङ्गव्युदासायापर्यायानेकशब्दप्रकाश्यत्वे सतीति विशेषणदलम् ।

‡ तत्प्रातिपदिकार्थत्वं प्रकृष्टप्रकाशश्चन्द्र इति वत्तदेकमात्रवस्तुपरत्वम् ।

सामानाधिकरण्यं च विशेषणविशेष्यता ।
लक्ष्यलक्षणभावश्च सम्बन्धोऽसौ त्रिधा मतः ॥ ५४ ॥
तेनोपेतान्महावाक्याज्जातं विज्ञानमात्मनः ।
तापं समूलमुन्मूल्य शान्तिं सम्पादयेद् ध्रुवाम् ॥ ५५ ॥
आध्यात्मिकस्तथैवाधिभौतिकश्चाधिदैविकः ।
तापोऽसौ त्रिविधः प्रोक्त आत्मनः शान्तिनाशनः ॥ ५६ ॥
सत्त्वं रजस्तमश्चैते गुणाः स्युः प्रकृतेस्त्रयः ।
ओतप्रोतमिदं सर्वं गुणैरेतैश्चराचरम् ॥ ५७ ॥

गत्यागलक्षणेत्युच्यते, यथा सोऽयं देवदत्त इति वाक्यस्य तद्देशकालवैशिष्ट्यै-तद्देशकालवैशिष्ट्यरूपविरुद्धांशत्यागेन देवदत्तपिण्डमात्रे वृत्तिस्तद्वत्तत्त्व-मसीत्यादिवाक्येऽपि सर्वज्ञत्वाल्पज्ञत्वादिविरुद्धांशपरित्यागेन चिन्मात्रयो-रभेदो भागत्यागलक्षणया द्योत्यते । पदार्थप्रत्यगात्मनाम्='तत्त्वमि'ति पदयोः सामानाधिकरण्यं, तदर्थयोश्चेश्वरजीवयोस्तत्त्वमसि त्वं तदसीति विशेष्यविशेषणभावः, पदयोस्तदर्थयोर्वेश्वरजीवयोर्निरुक्तविरुद्धांशपरित्या-गेन चिन्मात्रे लक्ष्यलक्षणभावः सम्बन्ध इति विवेकः ॥

५४ सामानाधिकरण्यम्–भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः । विशेष्यविशेषणभावः–मिथो विशेष्यविशेषणयोरनुलोमप्रतिलोम-तया विशेष्यविशेषणत्वे ॥

५५ तापस्तूक्त एव ॥

५६ शरीरमनसी अधिकृत्य जायमानस्तापः–आध्यात्मिकः, भूतानि (=व्याघ्रसर्पादीनि) अधिकृत्य जायमानस्तापः–आधिभौतिकः, देवान् (=यक्षरक्षआदीन्) अधिकृत्य जायमानस्तापः–आधिदैविकः ॥

५७ प्रकृतिः=त्रिगुणात्मिका माया, विशुद्धसत्त्वप्रधानाऽविद्येति यावत् । गुणवद् (=रज्जुवत्) आत्मनो बन्धकत्वात्सत्त्वादयो गुणाः ।

सुखं दानं तपो यज्ञः कर्त्ता ज्ञानं च कर्म च ।
तथाऽऽहारादयश्चान्ये सर्वे स्युस्त्रिगुणात्मकाः ॥ ५८ ॥

५८ सुखादयस्त्रिगुणात्मकाश्च भगवद्गीतायामुपवर्णिताः,—"यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् । विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् । परिणामे विषमिव तत्सुखं राजसं स्मृतम् । यदग्रे चानुबन्धे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्सुखं तामसं स्मृतम्"—इति सुखम्, "दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः । दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञातं तद्दानं तामसं स्मृतम्",—इति दानं, "श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्ष्यते ॥ सत्कारमानपूजार्थं तपो दम्भेन चैव यत् । क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ मूढग्राहेणात्मनो यत्पीडया क्रियते तपः । परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्"—इति तपः, "अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्त्विकः । अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् । इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते"—इति यज्ञः, "मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते । रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः । हर्षशोकान्वितः कर्त्ता राजसः परिकीर्तितः । अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः । विषादी दीर्घसूत्री च कर्ता तामस उच्यते"—इति कर्त्ता, "सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् । वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ यत्तु कृत्स्नवदेकस्मिन्कार्य्ये सक्तमहैतुकम् । अतत्त्वार्थवदल्पं च तत्तामसमिति स्मृतमि"ति ज्ञानम्, "नियतं सङ्गरहितमरागद्वेषतः कृतम् । अफलप्रेप्सुना कर्म यत्तत्सा-

गुणत्रयमयीमेतां मायाशक्तिं स्वराट् स्वयम् ।
प्रकृत्याख्यामवष्टभ्य कारणं ब्रह्म गीयते ॥ ५९ ॥
तुच्छाऽनिर्वचनीया च वास्तवी चेति भेदतः ।
माया ज्ञेया त्रिधा बोधैः श्रौतयौक्तिकलौकिकैः ॥ ६० ॥
व्यावहारिक्यथ प्रातिभासिकी पारमार्थिकी ।
ब्रह्मविश्वभ्रमार्थानां सत्ता ज्ञेया त्रिधैव च ॥ ६१ ॥

त्त्विकमुच्यते । यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः । क्रियते बहुलायासं तद्राजसमिति स्मृतम् । अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् । मोहादारभ्यते कर्म तत्तामसमुदीरितम्"—इति कर्म, "आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः । रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः । कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः । आहारा राजसस्येष्टा दुःखशोकाऽऽमयप्रदाः । यातयामं गतरसं पूति पर्य्युषितं च यत् । उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्"—इति चाहार इति ॥

५९ कारणम्—कार्य्याव्यवहितनियतपूर्ववृत्ति, तद् द्विविधम्—उपादानकारणं निमित्तकारणं चेति, तत्र कार्य्यान्वितं कारणमुपादानं यथा घटादेर्मृदादि, तद्भिन्नं कारणं निमित्तकारणं यथा घटादेः कुलालादि, ब्रह्म तु प्रपञ्चस्योर्णनाभिवदभिन्ननिमित्तोपादानम् ॥

६० श्रौतदृष्ट्या माया तुच्छा, यौक्तिकदृष्ट्याऽनिर्वाच्या, लौकिकदृष्ट्या च वास्तवीति विभागः ।

६१ ब्रह्मविश्वभ्रमार्थानाम्, ब्रह्मणः सत्ता पारमार्थिकी, विश्वस्य व्यावहारिकी, भ्रमविषयार्थानां शुक्तिरजतादीनां सत्ता च प्रातिभासिकीत्यर्थः । तत्र व्यावहारिकसत्ताऽज्ञातसत्तेति, प्रातिभासिकसत्ता च ज्ञातसत्तेत्यप्युच्यते ।

ब्रह्मणो मूर्तयस्तिस्रो ब्रह्मा विष्णुर्महेश्वरः ।
उत्पत्तिस्थितिसंहारकारिण्यो भुवनत्रये ॥ ६२ ॥
धूमादिरर्चिरादिश्च जनिमृत्यात्मकस्तथा ।
चन्द्रब्रह्मप्रपञ्चानां गतिमार्गास्त्रयः क्रमात् ॥ ६३ ॥
धूमं रात्रिं ततः कृष्णं षण्मासीं दक्षिणायनम् ।
संवत्सरं ततो देववायुलोकौ ततः क्रमात् ॥ ६४ ॥
आदित्यलोकतश्चन्द्रं योगी प्राप्य निवर्तते ।
अर्चिषोऽहस्ततः शुक्लं षण्मासीं चोत्तरायणम् ॥ ६५ ॥
संवत्सरं ततो देववायुलोकावनुक्रमात् ।
भानुलोकं ततश्चन्द्रलोकं लोकं च विद्युतः ॥ ६६ ॥
वरुणेन्द्रप्रजाऽधीशलोकान्प्राप्योत्तरोत्तरान् ।
ब्रह्मलोकं गतो विद्वान् भूयो नावर्त्तते ततः ॥ ६७ ॥
स्वर्गो मर्त्योऽथ पातालमित्येतद्भुवनत्रयम् ।
लोकत्रयं तथा धामत्रयमप्येतदुच्यते ॥ ६८ ॥

---

६२ उत्पत्तिस्थितिसंहारकारिण्यः=उत्पादको ब्रह्मा, स्थापकः (=पालकः) विष्णुः, संहारको महेश्वरः (=रुद्रः) ।

६३ इदानीमिष्टापूर्तादिकारिणां कर्मिणां चन्द्रलोकप्राप्तिमार्गो धूमादिः, हिरण्यगर्भब्रह्मोपासकानां च ब्रह्मलोकप्राप्तिमार्गोऽर्चिरादिः, पापानां च प्रपञ्चप्राप्तिमार्गो जनिमृतिलक्षण इत्याह-धूमादिरिति, निर्गुणब्रह्मचिन्तकानां तु "न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते"-इति श्रुतेर्गमागमशून्यत्वमेवेति ध्येयम् ।

६४ धूमादिरर्चिरादीत्यादिपदद्वयेन क्रमशो यद्यद्ग्राह्यं तत्तल्लोकचतुष्टयेनाह-धूममित्यादिना । धूमादिशब्दैस्तदभिमानिनो देवा ग्राह्याः ।

६८ धामत्रयम्-इत्युपलक्षणं जगत्त्रयसञ्ज्ञाया अपि ।

त्रिषु धामसु यज्ज्ञानं ज्ञाता ज्ञेयं च यद्भवेत् ।
त्रिपुट्येषात्मनो रूपं नातिक्रामति कर्हिचित् ॥ ६९ ॥
एतज्ज्ञानमिति प्रोक्तं स्वात्माऽज्ञानापहारकम् ।
प्रतिबन्धकमेतस्य संशयादि त्रिधा मतम् ॥ ७० ॥
संशयः स्वात्मनस्त्वाथ विपरीता च भावना ।
तथाऽसम्भावनैतत्स्यात्त्रयं तत् प्रतिबन्धकम् ॥ ७१ ॥
श्रुत्वा मत्वा निदिध्यास्य स्वात्मानं तन्निवर्तयेत् ।
श्रवणादित्रयं ह्येतत्कीर्तितं बोधसाधकम् ॥ ७२ ॥
अनिष्पन्नात्मबोधानां प्रपञ्चो निखिलोऽप्ययम् ।
स्वात्मातिरिक्तः सत्यो विभात्यज्ञानतोऽनिशम् ॥ ७३ ॥

---

६९ ज्ञानम्—विषयचैतन्याभिव्यञ्जकोन्तःकरणाज्ञानयोः परिणामरूपा वृत्तिः । ज्ञाता—निरुक्तज्ञानाश्रय आत्मा । ज्ञेयम्—निरुक्तज्ञानविषयः, ज्ञानेऽतिशयाधायको वा घटादिः । त्रिपुटी=त्रयाणां पुटानां ज्ञानप्रकाराणां समाहारः । आत्मरूपतां नातिक्रामति रज्जुसर्पयोरिव बाधसामानाधिकरण्येन, नतु नीलो घट इतिवन्मुख्यसामानाधिकरण्येन, मिथो विरुद्धयोस्तद्योगादिति ध्येयम् ।

७१ संशयादेर्लक्षणं तु प्रागुक्तमेव ।

७२ श्रुत्वेत्यादि । श्रवणं नाम—उपक्रमादिभिः षड्भिर्लिङ्गैः† वेदान्तानामद्वितीये ब्रह्मणि तात्पर्य्यावधारणम्, श्रुतस्यार्थस्य युक्तिभिश्चिन्तनं—मननम्, विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं—निदिध्यासनम्,—इदमेव ध्यानमित्याख्यायते ।

७३ दृश्यत्वं‡, जडत्वं, परिच्छिन्नत्वं, चिद्भिन्नत्वं च प्रपञ्चसामान्यलक्षणम् ।

---

† षड्विधलिङ्गानि तु अग्रे वक्ष्यन्ते ।
‡ दृश्यत्वं=चिद्विषयत्वं, न तु वृत्तिव्याप्यत्वं येन ब्रह्मणि व्यभिचारः स्यात् ।

स्थूलः सूक्ष्मस्तथैवाथ कारणात्मेति च त्रिधा ।
ज्ञेयः सर्वः प्रपञ्चोऽयं कालस्तद्वत्त्रिधा मतः ॥ ७४ ॥

भूतो भावी तथा वर्तमानश्चेति प्रभेदतः ।
कालोऽसौ स्यात्परिच्छेत्ता वस्तूनां जडसञ्ज्ञिनाम् ॥ ७५ ॥

दैशिकः कालिकश्चाथ तथा वास्तविकोऽपरः ।
परिच्छेदस्त्रिधा ज्ञेयो नाऽखण्डेऽसौ चिदात्मनि ॥ ७६ ॥

नापि भेदस्त्रिधा ख्यातो युज्यते तत्र कर्हिचित् ।
सजातीयो विजातीयः स्वगतश्चात्मवस्तुनि ॥ ७७ ॥

वासना त्रिविधा त्याज्या सर्वाऽनर्थनिवृत्तये ।
ज्ञानादित्रितयं तद्वदुपादेयं मुमुक्षुभिः ॥ ७८ ॥

---

७४ स्थूलत्वम्—पञ्चीकृतत्वम् । सूक्ष्मत्वम्—अपञ्चीकृतत्वम् । कारणत्वम्—स्थूलसूक्ष्मोभयविधप्रपञ्चजनकत्वम् । कालः—अतीतादिव्यवहारासाधारणं कारणम् ।

७५ सूर्य्यपरिस्पन्दादिक्रियावच्छिन्नः कालो वर्तमानः, तत्क्रियाध्वंसावच्छिन्नः कालो भूतः, तत्क्रियाप्रागभावावच्छिन्नः कालो भावी ।

७६ यत्किञ्चिद्देशावृत्तित्वं—दैशिकपरिच्छेदः । यत्किञ्चित्कालावृत्तित्वं-कालिकपरिच्छेदः, यत्किञ्चिद्वस्त्वनात्मत्वं—वस्तुपरिच्छेदः, त्रिविधोऽप्ययं परिच्छेदोऽनात्मन्येव घटादौ, नात्मनि, सर्वत्र सर्वदा सर्ववस्त्वात्मत्वात् ।

७७ समानजातिकृतो भेदः—सजातीयः, यथा वृक्षस्य वृक्षान्तरात्; विरुद्धजातिकृतो भेदः—विजातीयः, यथा वृक्षस्य शिलादितः; स्वावयवैः कृतो भेदः—स्वगतो यथा वृक्षस्य पर्णपुष्पफलादित इति ।

७८ वासना—अनुभवजन्या स्मृतेर्हेतुः ।

देहस्य वासनाऽथापि वासना लोकशास्त्रयोः ।
वासनैवं त्रिधा पुंसां सर्वानर्थकरी स्मृता ॥ ७९ ॥
ज्ञानं चोपरतिस्तद्वद्वैराग्यमिति च त्रयम् ।
जातमात्रं विहन्त्याशु सर्वानर्थं हि देहिनाम् ॥ ८० ॥
हेतुस्वरूपकार्य्याणि क्रमाद्धेत्वादिकत्रयम् ।
ज्ञानादित्रितयस्यास्य विद्वद्भिः परिकीर्तितम् ॥ ८१ ॥

---

७९ तामेव त्रिविधामाह–देहस्येत्यादिना । देहानुभवजनितत्वे सति देहस्यैव पुनः पुनः (पुष्ट्याद्यर्थम्) स्मरणहेतुः–देहवासना । लोकानुभवजनितत्वे सति लोकस्यैव पुनः पुनः (रञ्जनाद्यर्थम्) स्मरणहेतुः–लोकवासना । शास्त्रानुभवजनितत्वे सति शास्त्रस्यैव पुनः पुनः (वादिजयाद्यर्थम्) स्मरणहेतुः –शास्त्रवासना ।

८० उद्दिष्टं ज्ञानादित्रयं दर्शयति–ज्ञानं चेति । ज्ञानम्–प्रत्यगात्मनि देहाद्यतिरिक्तत्वप्रकारको देहादौ वा प्रत्यगात्मातिरिक्तत्वप्रकारको निश्चयः। तद् द्विविधम्–परोक्षमपरोक्षं च । तत्रासन्दिग्धाऽविपर्य्यस्तो निश्चयोऽपरोक्षम्, संशयादिग्रस्तं च परोक्षम् । उपरतिः–विहितानां कर्मणां विधिना परित्यागः (=संन्यासः) । वैराग्यं–विषयेषु जिहासा ।

८१ ज्ञानस्य हेतुः श्रवणादित्रयम्, अहं देहाद्यतिरिक्तः साक्षीति निश्चयः स्वरूपम्, अनात्मन्यात्मत्वबुद्ध्यभावो ज्ञानस्य कार्य्यम्; वैराग्यस्य हेतुर्विषयेषु दोषदृष्टिः, वान्ताशनवद्धेयताबुद्धिः स्वरूपम्, पुनराशाभावः कार्य्यम् ; उपरतेर्हेतुर्यमनियमादि, चित्तनिरोधः स्वरूपम्, सर्वव्यवहारनाशः कार्य्यमिति विवेकः । वैराग्यस्यावधिर्ब्रह्मलोकतृणीकारः, ज्ञानस्यावधिः पुनः संशयविपर्य्ययाद्यनुत्पादः, सुप्तिवत्समस्तवस्तुविस्मृतिश्चोपरतेरित्यपि बोध्यम् ।

श्रवणादित्रयं यद्वज्ज्ञानादौ हेतुरीरितम् ।
प्राणायामोऽपि तद्वत्स्यान्मनःस्थैर्येण देहिनाम् ॥ ८२ ॥
पूरको रेचकश्चैव कुम्भकश्चेति भेदतः ।
प्राणायामस्त्रिधा स स्यान्मनोबन्धनकारकः ॥ ८३ ॥
आन्ध्यं मान्द्यं पटुत्वं च नेत्रधर्मास्त्रयो मताः ।
तादात्म्याध्यासतस्ते तु भासन्ते स्वात्मवस्तुनि ॥ ८४ ॥
तादात्म्यं त्रिविधा प्रोक्तं कर्मजं सहजं तथा ।
भ्रान्तिजं चाप्यहङ्कारचिच्छायादेहसाक्षिणाम् ॥ ८५ ॥
एषणा त्रिविधा पुत्रवित्तलोकात्मगोचरा ।
सुप्तिमूर्छासमाधीनां भेदात् सुप्त्यादिकत्रयम् ॥ ८६ ॥

---

८२ मनःस्थैर्येण=मनःस्थैर्यद्वारा ।

८३ पूरकः–इडया (=वामनासिकया) षोडशमात्राभिः * प्राणवायोः पानम्, रेचकः–पीतस्य वायोर्द्वात्रिंशन्मात्राभिस्त्यागः, कुम्भकः–पीतस्य वायोश्चतुःषष्टिमात्राभिरायमनम् ।

८५ तादात्म्यम्–तद्भिन्नत्वे सति तदभिन्नसत्ताकत्वम् । अहङ्कारचिच्छायादेहसाक्षिणाम्=अहङ्कारस्य चिच्छायया (=चिदाभासेन) सहजं तादात्म्यं, स्थूलदेहेन कर्मजम्, साक्षिणा च भ्रान्तिजमिति विवेकः ।

८६ एषणा=अभिमानः । पुत्राभिमानः पुत्रैषणा, वित्ताभिमानो वित्तैषणा, लोकाभिमानो लोकैषणा । सुप्त्यादेर्लक्षणं तु प्रागुक्तमेव ।

---

* षोडशेत्याद्युपलक्षणं सङ्ख्यान्तरस्यापि, परमयमुत्तमः प्रकारोऽत्र निर्दिष्टः, ओङ्कारोच्चारणेन यावान्कालः प्रभवति स मात्राशब्देन ग्राह्यः, यद्वा जानु-परितो हस्तं भ्रमयित्वा छोटिकाध्वनिकरणे यावान्कालः स मात्राकाल इत्युच्यते ।

रामानुजमते तत्त्वत्रयं चिदचिदीश्वराः ।
शब्दानुमानप्रत्यक्षरूपं मानत्रयं तथा ॥ ८७ ॥
वासनानन्द इत्याद्यो ब्रह्मानन्दो द्वितीयकः ।
तृतीयो विषयानन्द इत्यानन्दस्त्रिधा भवेत् ॥ ८८ ॥
प्राग्लोपोऽविनिगम्यत्वं प्रमाणापगमस्तथा ।
दोषा एतेऽनवस्थाया अङ्गीकारे त्रयो मताः ॥ ८९ ॥
अतिव्याप्तिस्तथाऽव्याप्तिर्दोषश्चासम्भवस्तथा ।
दोषा एते त्रयः ख्याताः सर्वलक्षणदूषकाः ॥ ९० ॥

---

८७ इदानीं रामानुजमतेन तत्त्वत्रयमाह—रामानुजमते इति । एतन्मते चिदचिदीश्वरयोः शरीरशरीरिभावः, अनन्तकल्याणगुणसागरः सिद्धोपायो विभुश्चेश्वरः, तदीश्वर एवोपायः स एव चोपेयः, जीवस्त्वणुरेव, लक्ष्म्या आत्मा च मतभेदेनाणुर्विभुश्च । तथा शब्दप्रत्यक्षयोर्विरोधे प्रत्यक्षं प्रबलम् । शब्दादिप्रमाणस्य लक्षणमग्रे चतुर्विधप्रमाणप्रतिपादनावसरे वक्ष्यते ।

८८ शाङ्करमतेनानन्दत्रयमाह—वासनेति । आनन्दः—सात्त्विकैकाग्रबुद्धिप्रतिबिम्बितः सुखरूप आत्मा निरुक्तात्मप्रतिबिम्बिता वृत्तिर्वा । ब्रह्मानन्दः—द्वैतभानाभावविशिष्टनिद्राऽभावकालीनब्रह्माभिमुखवृत्त्यभिव्यङ्ग्य-आनन्दः । निजानन्द—योगानन्द—मुख्यानन्दा—ऽद्वैतानन्दा—ऽऽत्मानन्दानामस्मिन्नेवान्तर्भावः । तत्तत्स्रक्चन्दनवनितादिविषयाकारैकाग्रबुद्ध्यभिव्यङ्ग्य आनन्दो विषयानन्दः, विद्यानन्दोऽत्रैवान्तर्भवति । ब्रह्मध्यानादि† व्युत्थितस्य या आनन्दस्य वासना लशुनभाण्डाद्विष्कासितेष्वपि लशुनेषु (तद्गन्धवासनावद्) अनुवर्त्तन्ते ता वासनानन्दः ।

८९ प्राग्लोपादीनां लक्षणमात्माश्रयादिषड्दूषणप्रस्तावे वक्ष्यामः ।

९० लक्षणम्—असाधारणधर्मः, यद्वा लक्ष्यतावच्छेदकसमनियतत्वं लक्ष-

† आदिपदेन विषयध्यानस्य सुषुप्तेश्च परिग्रहः ।

अन्यथाप्युपपत्तिश्चोपपत्तिरन्यथैव च ।
तथाऽनुदय इत्यर्थापत्तेर्दोषास्त्रयो मताः ॥ ९१ ॥
प्रमातुश्च प्रमाणस्य दोषो मेयस्य चैव हि ।
दोषास्त्रयः प्रमाचादेः सर्वभ्रान्तिविभावकाः ॥ ९२ ॥

णत्वम् । लक्ष्यतावच्छेदकसमनियतत्वं नाम लक्ष्यतावच्छेदकेन सह समव्याप्तिकत्वं, यथा अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यमिति प्रमातृलक्षणे यत्रयत्रान्तःकरणावच्छिन्नचैतन्यत्वं तत्रतत्र प्रमातृत्वं यत्र यत्र च प्रमातृत्वं तत्र तत्रान्तःकरणावच्छिन्नचैतन्यत्वमिति लक्ष्यतावच्छेदकेन प्रमातृत्वेन सह लक्षणस्य समव्याप्तिरिति, तस्य च लक्षणस्याति व्याप्त्यादीनि त्रीणि दूषणानि । तत्रातिव्याप्तिः—लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वम्, यथा गोः शृङ्गित्वं लक्षणं लक्ष्यगोवृत्तित्वे सत्यलक्ष्यमहिष्यादिवृत्ति । लक्ष्यैकदेशावृत्तित्वम्—अव्याप्तिः, यथा गोः कपिलत्वं लक्षणं श्वेतगवादौ लक्ष्यैकदेशेऽवृत्ति । लक्ष्यमात्रावृत्तित्वमसम्भवः, यथा गोरेकशफवत्त्व लक्षणं लक्ष्यगोमात्रावृत्ति, गोर्द्विशफवत्त्वादिति ।

९१ अन्यथाप्युपपत्तिर्यथा वैदान्तिकेन शुक्तौ ख्यातत्वे सति बाध्यत्वान्यथानुपपत्त्या ‡ ऽनिर्वचनीयरजते प्रसाधिते नैयायिकमते देशान्तरे सत्त्वात् ख्यातिः पुरोऽसत्त्वाच्च बाध इति । अनुदयश्च—असतोऽपि तद्वाचकशब्देन भानस्याऽऽवश्यकत्वेन भानाभावस्याऽनुपपत्तेः, अन्यथा शब्दप्रयोगोऽनर्थकः स्यादिति । अन्यथैवोपपत्तिर्नाम— वैपरीत्येनोपपत्तिसाम्यम्, यथा निरुक्तस्थले एव नैयायिकमते, रजतस्य सद्विलक्षणत्वे नृशृङ्गवत्ख्यात्यनुपपत्तेः, असद्विलक्षणत्वे च ब्रह्मवद्बाधानुपपत्तेरुभयविलक्षणत्वे च ख्यातिबाधयोरुभयोरनुपपत्तेर्न सदसद्विलक्षणत्वरूपमनिर्वचनीयत्वमिति विपरीतोपपत्तिसाम्यमिति ।

---

‡ शुक्तौ रजतस्याऽसत्त्वे शशशृङ्गवत् ख्यातिर्न स्यात्, सत्त्वे ब्रह्मवद्बाधो न स्यादुभयस्य (ख्यातत्वे सति बाध्यत्वस्य) चेह दर्शनाद्रजतस्यानिर्वचनीयत्वम् ।

भीतिलोभादिकं मातुर्दोषः काचादिकस्तथा ।
मानस्य, चाकचक्यादिर्मेयदोषः प्रकीर्तितः ॥ ९३ ॥
आगामि सञ्चितं कर्म प्रारब्धं चेति भेदतः ।
कर्माणि त्रिविधानि स्युस्त्रिचाण्यखिलदेहिनाम् ॥ ९४ ॥
जाग्रज्जाग्रत्तथा जाग्रत्स्वप्नजाग्रत्सुषुप्तिके ।
एवं त्रैविध्यमापन्नं जाग्रदुक्तं मनीषिभिः ॥ ९५ ॥
स्वप्नजाग्रत्तथा स्वप्नस्वप्नस्वप्नसुषुप्तिके ।
स्वप्नत्रयं समाख्यातमेवं वेदान्तपारगैः ॥ ९६ ॥
सुप्तिजाग्रत्तथा सुप्तिसुप्तिसुप्तिसुषुप्तिके ।
त्रैविध्यं हि गतेत्येवंभेदात्सुप्तिस्तथैव च ॥ ९७ ॥

---

९३ चाकचक्यादिः शुक्तिरूप्ययोः सादृश्यं मेयस्य शुक्त्यादेर्दोषः, आदिपदेन दूरस्थत्वादिकं ग्राह्यम् ।

९४ इह जन्मनि (= वर्तमाने) क्रियमाणं कर्म—आगामि, जन्मान्तरहेतुभूतं सदवस्थितं पूर्वजन्मीनं कर्म—सञ्चितम्, वर्तमानशरीरारम्भकं कर्म—प्रारब्धम् ।

९५ प्रमाज्ञानं—जाग्रज्जाग्रत् । शुक्तिरजतादिभ्रमो-जाग्रत्स्वप्नः । जाग्रदवस्थायां श्रमादिना स्तब्धीभावः—जाग्रत्सुषुप्तिः ।

९६ स्वप्ने मित्रादिप्राप्तिः—स्वप्नजाग्रत् । स्वप्नेऽपि स्वप्नो मया दृष्ट इति बुद्धिः स्वप्नस्वप्नः । जाग्रद्दशायां वक्तुमशक्यं यत्किञ्चित् स्वप्नेऽनुभूयते तत्स्वप्नसुषुप्तिः ।

९७ सुषुप्त्यवस्थायां सात्त्विकी या सुखाकारा वृत्तिः (यदनन्तरं प्रबुद्धस्य सुखमहमस्वाप्समिति परामर्शः) सा सुषुप्तिजाग्रत् । तत्रैव या राजसी वृत्तिः (यदनन्तरं दुःखमहमस्वाप्समिति प्रबुद्धस्य परामर्शः) सा सुषुप्तिस्वप्नः ।

ज्ञानात्मा च महानात्मा शान्तात्मा चेति भेदतः ।
आत्मा वेदान्तशास्त्रेऽस्मिन् स्यात्त्रिधा परिभाषितः ॥ ९८ ॥
नादवर्णकलास्तद्वन्नादादित्रिकमुच्यते ।
एवं त्रिचिक्रमेणोक्ताः सञ्ज्ञा वेदान्तिनामिमाः ॥ ९९ ॥
(४)मध्यमा वैखरी चैव पश्यन्ती च परा तथा ।
एषा चतुर्विधा ज्ञेया वाणी वेदान्तदर्शने ॥ १०० ॥
धर्मार्थकाममोक्षाः स्युः पुरुषार्थचतुष्टयम् ।
तथा चतुर्विधः शब्दप्रवृत्तेर्हेतुरुच्यते ॥ १०१ ॥

तत्रैव या तामसी वृत्तिः (यदनन्तरं गाढं मूढोऽहमस्वाप्समिति परामर्शः सा सुषुप्तिसुषुप्तिः ।

९८ ज्ञानात्मा—ज्ञातृत्वोपाध्यहङ्कारावच्छिन्नं चैतन्यम् । महानात्मा—सर्वव्यक्तिषु व्याप्तं चैतन्यम् । शान्तात्मा—सर्वान्तर्बहिर्भावेनानुगतचैतन्यमिति विवेकः ।

९९ संवृत्ते गलविवरे यत्कण्ठनिनादनकरणं स नादः । अनुस्वारो विन्दुः । नादैकदेशः कला ।

१०० मूलाधारचक्रस्थवाय्वभिव्यङ्ग्योऽतिसूक्ष्मात्माऽस्मदादेरप्रत्यक्षः शब्दः—परा, नाभिचक्रस्थवाय्वभिव्यङ्ग्यो योगिप्रत्यक्षगोचरः शब्दः पश्यन्ती, हृच्चक्रस्थवाय्वभिव्यङ्ग्यस्ततोऽपि स्थूलात्मा शब्दो मध्यमा, मौखिकवाय्वभिव्यङ्ग्यः सर्वश्रुतिगोचरः स्थूलः शब्दो वैखरी ।

१०१ धर्मः—वेदप्रतिपाद्यः प्रयोजनवदर्थः । अर्थ्यते प्रार्थ्यते प्राणिभिरित्यर्थो वित्तादिः । काम्यते जनैरिति कामः, स्वर्गादिः । मोक्षः—निखिलदुःखनिवृत्तिपुरस्सरं स्वात्मानन्दावाप्तिः ।

गुणः क्रियाप्यथो जातिः सम्बन्धश्चेति भेदतः ।
ब्रह्मविट्क्षत्रशूद्राःस्युस्तथा वर्णचतुष्टयम् ॥ १०२ ॥
ब्रह्मचर्य्यं च गार्हस्थ्यं वानप्रस्थं तथैव च ।
संन्यासश्चेति भेदेन स्युश्चत्वारस्तथाऽऽश्रमाः ॥ १०३ ॥
सर्वेषामेव शास्त्राणामनुबन्धचतुष्टयम् ।
पृथक् पृथक् भवत्येतज्ज्ञातं शास्त्रे प्रवर्तकम् ॥ १०४ ॥

---

१०२ गुणः—निर्गुणत्वे निष्क्रियत्वे च सति सामान्यवान् । क्रिया—संयोगविभागयोरसाधारणो हेतुः । जातिः—अनुगतबुद्धिव्यवहारहेतुभूता-परसामान्यम्, अनुगतबुद्धिव्यवहारहेतुभूतं परसामान्यं तु सत्तेत्याख्यायते । सम्बन्धः—संसृष्टबुद्धिव्यवहारयोर्हेतुः । नैसर्गिकशमादिनवसाधन*संपन्नो जातिविशेषो वा ब्राह्मणः । क्षत्रियः—शौर्य्यादिनैसर्गिकसाधनसम्पन्नो जातिविशेषो वा । वैश्यः—कृषिगोरक्षवाणिज्यादिस्वाभाविककर्मसम्पन्नो जातिविशेषो वा । शूद्रः—परिचर्य्यादिस्वाभाविककर्मसम्पन्नो जातिविशेषो वा ।

१०३ अष्टाङ्ग†मैथुनवर्जनम्—ब्रह्मचर्य्यम् । ब्रह्मचारी द्विविधो, नैष्ठिक उपकुर्वाणश्च । तत्र यावज्जीवं गृहीतब्रह्मचर्यव्रतो नैष्ठिको ब्रह्मचारी, विवत्सन्‡ गृहीतब्रह्मचर्यव्रतश्चोपकुर्वाण इति । गृहस्थः—वैवाहिकेन विधिना कृतपत्नीपरिग्रहः । वानप्रस्थः—गृहस्थाश्रममपहाय गृहीतमुनिवृत्तिः संन्यस्तः । संन्यासलक्षणं तूक्तमेव ।

१०४ मङ्गलाचरणाव्यवहितोत्तरमेव ग्रन्थादावनुबद्ध्यमानः—अनुबन्धः । यद्वा, स्वविषयकज्ञानद्वारा शास्त्रे प्रवर्तकोनुबन्धः ।

---

* "शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ज्ञानं विज्ञानमास्तिक्यमि"ति नव साधनानि ।

† स्त्रिया दर्शनं, स्पर्शनं, केलिः, कीर्तनं, गुह्यभाषणं, सङ्कल्पः (इयं मे स्यादिति), अध्यवसायः (अनया रमिष्ये इति), क्रियानिर्वृत्तिश्चेत्यष्टौ मैथुनस्याङ्गानि ।

‡ विवत्सन् = विवाहं करिष्यमाणः ।

सम्बन्धश्चाधिकारी च तथा मेयप्रयोजने ।
एवं भेदेन भिन्नं तद्विद्वद्भिः परिभाषितम् ॥ १०५ ॥
यथा वेदान्तशास्त्रस्य सर्वसाधनसंयुतः ।
अधिकारी भवेज्जीवो रागद्वेषादिवर्जितः ॥ १०६ ॥
जीवस्य ब्रह्मणा चैक्यं मेयस्तद्वत्प्रकीर्त्यते ।
वाच्यवाचकभावादिः सम्बन्धः शं प्रयोजनम् ॥ १०७ ॥
विवेकश्च विरागश्च षट्संपत्तिस्तथैव च ।
मुमुक्षुत्वं च चत्वारि साधनानि विदुर्बुधाः ॥ १०८ ॥
ऋग्यजुःसामवेदाश्च वेद आथर्वणस्तथा ।
वेदाश्चत्वार इत्येते निर्गताः ब्रह्मणो मुखात् ॥ १०९ ॥
मनोबुद्धिरहङ्कारश्चित्तं चेति चतुर्विधम् ।
स्यादन्तः करणं वृत्तिभेदादेकं स्वरूपतः ॥ ११० ॥
सङ्कल्पो निश्चयो गर्वश्चिन्तनं चेति भेदतः ।
वृत्तयस्ताश्चतस्रः स्युर्मनआदेर्यथाक्रमम् ॥ १११ ॥

---

१०७ वाच्यवाचकभावादिरिति, जीवब्रह्मैक्यलक्षणमेयेन सह वेदान्तशास्त्रस्य वाच्यवाचकभावः सम्बन्धः, अधिकारिणः प्रयोजनेन सह प्राप्यप्रापकभावः, अधिकारिणः प्रमेयेण सहानुष्ठात्रनुष्ठेयभावः सम्बन्ध इत्याद्यादिशब्दादवधेयम् ।

१११ यथाक्रमम्=सङ्कल्पविकल्पात्मवृत्तिमदन्तःकरणं—मनः, निश्चयात्मिकवृत्तिमदन्तःकरणं—बुद्धिः, अभिमानात्मिकवृत्तिमदन्तःकरणम्—अहङ्कारः, अनुसन्धानात्मिकवृत्तिमदन्तःकरणं—चित्तमिति ।

प्रत्यक्षं चानुमानं च तथा शब्दोपमानके ।
एवं चतुर्विधं प्रोक्तं प्रमाणं मेयसाधकम् ॥ ११२ ॥
विनिश्चित्य प्रमाणेन प्रमेयं ब्रह्मलक्षणम् ।
यदा ध्यायति तत्काले भवेद् विघ्नचतुष्टयम् ॥ ११३ ॥
लयविक्षेपसञ्ज्ञौ द्वौ रसाऽऽस्वादस्तथैव च ।
कषायश्चेति तान् विघ्नाञ्छिन्द्यात्सम्बोधनादिभिः ॥ ११४ ॥

---

११२ बोद्धृद्वा वृत्तिर्वृत्तीद्धबोधो वा–प्रमा, तत्करणं–प्रमाणम् । विषयचैतन्याभिन्नं प्रमाणचैतन्यं–प्रत्यक्षप्रमा, तत्करणं प्रत्यक्षम्; लिङ्ग*ज्ञानजन्यं ज्ञानमनुमितिस्तत्करणम्–अनुमानम् ।

११३ विघ्नत्वं सामान्यतः–कार्योत्पादप्रयोजकीभूतधर्मविघटकत्वम्,–इदमेव प्रतिबन्धकत्वशब्देन प्रागुदाहृतम् । ध्यानशब्देन प्रकृते समाधिर्ग्राह्यः तथा च समाध्युत्पादप्रयोजकीभूतधर्मविघटकत्वं–समाधिप्रतिबन्धकत्वम् ।

११४ लयः=निद्रा, पुनः पुनर्विषयानुसन्धानं–विक्षेपः, चित्तस्य रागादिना स्तब्धीभावः–कषायः, समाध्यारम्भसमये ब्रह्मानन्दानवाप्तौ स्थूलवृत्त्यभावानन्दास्वादः–रसास्वादः । छिन्द्यात्सम्बोधनादिभिः=प्राणायामादिना लयाभिमुखं चित्तं सम्बोधयेत् (=उत्थापयेत्), विषयदोषदर्शनादिना विक्षिप्तं चित्तं शमयेत्, सकषायं च मूलतो विजानीयात् (कस्माच्चित्तमुत्तिष्ठति कथञ्चेति), अपूर्णत्वज्ञानेन च समाध्यारम्भकालीनं रसं नास्वादयेदित्यर्थः ।

---

* व्याप्त्याश्रयो लिङ्गम्, साध्यसाधनयोर्नियतसामानाधिकरण्यं च व्याप्तिः, तथा च व्याप्यज्ञानाद्व्यापकज्ञानमनुमितिरिति निष्पन्नम् । सा चानुमितिर्द्विविधा, स्वार्था च परार्था चेति, तत्र स्वस्य व्याप्यप्रतीत्यनन्तरं व्यापकप्रत्ययः स्वार्थानुमितिः, स्वयं व्याप्याद्व्यापकं प्रतीत्य परप्रतिपत्त्यर्थं प्रयुक्ताच्चावयववाक्यात्परस्य व्यापकप्रत्ययः–परार्थानुमितिः, प्रतिज्ञाहेतूदाहरणानि, उदाहरणोपनयनिगमनानि वाऽवयवास्त्रयः । तत्र पक्षे साध्यनिर्देशः–प्रतिज्ञा, यथा पर्वतो वन्हिमानिति । तृतीयान्तं पञ्चम्यन्तं वा हेतुः, यथा धूमेन धूमाद्वेति, लौकिकवैदिकानां यत्रार्थे प्रतिपत्तिसाम्यं स दृष्टान्तः यथा महानसवदिति, उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः, हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनं यथा तस्मात् (=धूमात्) तथा (=वन्हिमान्) इति ।

रागद्वेषादिदोषाणां प्रशमार्थं चाथ भावयेत् ।
मैत्र्यादिभावनां सर्वभूतेषु बुद्धिमान्नरः ॥ ११५ ॥
मैत्री च करुणा चैवोपेक्षा च मुदिता तथा ।
एवं चतुर्विधैवेयं मैत्र्यादेर्भावना भवेत् ॥ ११६ ॥
जरायुजाण्डजस्वेदजोद्भिज्जाख्यश्चतुर्विधः ।
भूतग्रामो बुधैः प्रोक्तो वैचित्र्यं कर्मतो गतः ॥ ११७ ॥
ब्रह्मवेदनयोग्यं स्याच्छरीरं तत्र मानवम् ।
प्रायो जरायुजं नान्यद्ब्रह्मार्थित्वाद्यसम्भवात् ॥ ११८ ॥
तद्विद्वरवरीयस्यस्तद्विद्वरिष्ठयाऽन्विताः ।
एतास्सर्वाश्चतस्रः स्युर्ब्रह्मवेदनभूमयः ॥ ११९ ॥
हर्म्यादिभूमिवद्वृद्धिं गताश्चैवोत्तरोत्तरम् ॥
आद्या गवाक्षवत्तत्र वाङ्निरोध उदाहृतः ॥ १२० ॥

---

११६ मैत्री—सुखिष्वात्मीयत्वभावनम्, यद्वा निरुक्तभावनापूर्वक आनन्दः । करुणा—दुःखिषु दुःखप्रहाणार्थं दया, मुदिता—पुण्येष्वभ्युत्थासनादिभिः सत्कारः । उपेक्षा—पापेषु सत्कारतिरस्कारयोरौदासीन्यम् ।

११७ जरायुजम्—जरायोर्जातं (मनुष्यपश्वादिशरीरम्), अण्डजम्—अण्डाज्जातं (पक्षिपन्नगादिशरीरम्), स्वेदजम्—स्वेदादुत्पन्नं (यूकालिक्षादिशरीरम्), उद्भिज्जं—भूमिमुद्भिद्य जातं तरुगुल्मादिशरीरम् ।

११८ "मानवम्"—इत्युपलक्षणं देवानामपि ।

११९ तद्विदिति, तच्छब्देन प्रकृते ब्रह्म ग्राह्यम्, तथा च ब्रह्मविद्,—ब्रह्मविद्वरो—ब्रह्मविद्वरीयान्—ब्रह्मविद्वरिष्ठः—इति चतस्रो ज्ञानभूमयः । भूमिर्नाम हर्म्यादेरुत्तरोत्तरभूमिवज्ज्ञानस्यावस्थाविशेषः, एता एव सत्त्वापत्तिरसंसक्तिः पदार्थाभावनी तुर्य्यगा चेत्येतैर्नामभिरग्रे शुभेच्छादिकं भूमित्रयान्तरं संयोज्य सप्तविधा भूमीर्वक्ष्यति ।

यत् स्यान्निर्मननत्वं च बालमुग्धादिवत्तु तत् ।
द्वितीया गर्वराहित्यं तन्द्रायामिव चापरा ॥ १२१ ॥
सुप्ताविव महत्तत्त्वशून्यत्वं च तुरीयका ।
एता भूमीरभिप्रेत्य कृष्णोप्याहाऽर्जुनं प्रति ॥ १२२ ॥
"शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिच्चिन्तयेदि"ति ॥ १२३ ॥
कुटीचकस्तु प्रथमो यतिरन्यो बहूदकः ।
हंसः परमहंसश्च यतयस्तुश्चतुर्विधाः ॥ १२४ ॥
यतमानातिरेकाख्यावेकेन्द्रियवशीकृती ।
चत्वारः स्युरिमे भेदा वैराग्यस्यापरस्य च ॥ १२५ ॥
अध्यात्मविद्याऽध्ययनं सतां च ।
सङ्गो, निरासोऽखिलवासनानाम् ।
प्राणप्रवाहस्य शनैर्निरोधः ।
युक्तीरिमाश्चित्तजये वदन्ति ॥ १२६ ॥

---

१२५ पूर्वं द्विविधसञ्ज्ञाप्रकरणे परापरभेदेन द्विविधं वैराग्यं निरूपितं तत्रापरवैराग्यं यतमानादिभेदेन चतुर्विधं दर्शयति–यतमानेति, यतमानम्–अस्मिन्संसारे इदं सारमिदमसारमिति सारासारविवेकः । व्यतिरेकवैराग्यम्–चित्तगतदोषाणां मध्ये पक्वेभ्योऽपक्वान्व्यतिरेकेणावधार्य्य तज्जिहासा । इन्द्रियान्तरेषूपसंहृतेष्वप्यनुपसंहृतस्य मनसो वृत्तिजिहासा–एकेन्द्रियत्ववैराग्यम् वशीकारवैराग्यम्–ऐहिकामुष्मिकविषयजिहासा ।

१२६ अध्यात्मविद्याध्ययनम्–वेदान्तविद्याविचारः, शनैर्निरोधः–"द्वौ भागौ पूरयेदन्नैर्जलेनैकं प्रपूरयेत् । मारुतस्य प्रचारार्थं भागमेकं विशेषयेद्"–इत्यादियोगशास्त्रोक्तप्रक्रियया निरोध इत्यर्थः ।

शीतोष्णकठिनाश्चाथ मृदुश्चेति चतुर्विधः ।
स्पर्शः प्राज्ञैः सुविज्ञेयो धर्मो वातानलाब्भुवाम् ॥ १२७ ॥

परात्मा वासुदेवाख्यो जीवः सङ्कर्षणाभिधः ।
प्रद्युम्नाख्यं मनश्चैव गर्वोऽनिरुद्धसञ्ज्ञकः ॥ १२८ ॥

चतुर्व्यूहमिदं प्रोक्तं वासुदेवादिलक्षणम् ।
श्रीरामानुजमध्वाद्यैः प्रविविच्य स्वदर्शने ॥ १२९ ॥

रामानुजीयसिद्धान्ते ज्ञेया जीवाश्चतुर्विधाः ।
बद्धा मुमुक्षवो मुक्ता नित्यमुक्ताश्च केचन ॥ १३० ॥

नित्यबद्धा अपि प्रोक्ता जीवा माध्वैः स्वदर्शने ।
परं रामानुजादीनां मतेऽयुक्तमिदं मतम् ॥ १३१ ॥

एवं चतुर्विधा भिन्नाः सञ्ज्ञाः सम्यगुदाहृताः ।
पञ्चपञ्चप्रकाराश्च प्रोच्यन्ते साम्प्रतं त्विमाः ॥ १३२ ॥

(५)कोशाः पञ्च समाख्यातास्छादकत्वान्निजात्मनः ।
अन्नं प्राणो मनो बुद्धिरानन्दश्चेति तन्मयाः ॥ १३३ ॥

---

१२७ स्पर्शः—त्वगिन्द्रियमात्रग्राह्यो गुणः ।

१२८ साम्प्रतं श्रीरामानुजाचार्य्यादिवैष्णवमतेन चतुर्व्यूहमाह—परात्मेति, एतन्मते वासुदेवाख्यात्परमात्मनः सङ्कर्षणाख्यो जीव उत्पद्यते, तस्मात्प्रद्युम्नाख्यं मनः, ततोऽनिरुद्धाख्योहङ्कार इति ।

१३० बद्धा मुमुक्षवश्च जीवा अस्मदादयः, मुक्ता वामदेवादयः, नित्यमुक्ताश्च गरुडविष्वक्सेनादयो ज्ञेयाः ।

१३३ पुनः शाङ्करमतेन सञ्ज्ञा वक्तुमुपक्रमते—कोशा इति । कोशत्वम्—असिकोशवदात्माच्छादकत्वम् । अन्नमयः कोशः—मातृपितृभुक्तान्न-

नित्यं नैमित्तिकं काम्यं प्रायश्चितं तथाविधम्।
निषिद्धं चेति कर्माणि पञ्च स्युः सर्वदेहिनाम्॥ १३४॥

कर्मणां साधकानि स्युः पञ्च कर्मेन्द्रियाणि च।
वाक्पाणिपादपायूपस्थाभिधानानि देहिनाम्॥ १३५॥

व्यापाराः पञ्चधा चैषां स्मृताः प्रातिस्विकाः क्रमात्।
उक्त्यादानविहारोत्सर्गानन्दाः सर्वसम्मताः॥ १३६॥

ज्ञानेन्द्रियाण्यथो पञ्च प्रोक्तानि विदुषां वरैः।
घ्राणत्वक्श्रोत्ररसनचक्षुःसञ्ज्ञानि सन्ततम्॥ १३७॥

ञशुक्रशोणितकार्य्यं स्थूलशरीरम्। कर्मेन्द्रियैः सहितः प्राणः—प्राणमयः कोशः। कर्मेन्द्रियैः सहितं मनो मनोमयः कोशः। ज्ञानेन्द्रियैः सहिता बुद्धिर्विज्ञानमयः कोशः।

१३४ कर्म—शुभाशुभादृष्टजनको व्यापारः। नित्यं कर्म—अकरणे प्रत्यवायजनकम् (यथा ब्राह्मणस्य सन्ध्यागायत्र्यादि), नैमित्तिकम्—कुतश्चिन्निमित्तात्कृतम् (यथा पुत्रेष्ट्यादि), प्रायश्चित्तम्—पापक्षयसाधनम् (यथा कृच्छ्रचान्द्रायणादि), काम्यं—स्वर्गादीष्टसाधनम् (यथा ज्योतिष्टोमादि), निषिद्धम्—प्रत्यवायजनकम् (यथा गोहत्यादि)।

१३५ कर्मेन्द्रियाणि—कर्मसाधनानीन्द्रियाणि। उक्तिसाधनमिन्द्रियं—वाक्, आदानसाधनमिन्द्रियम्—पाणी, विहारसाधनमिन्द्रियम्—पादौ, उत्सर्गसाधनमिन्द्रियं—पायुः, व्यवायाऽऽनन्दसाधनमिन्द्रियम्—उपस्थः।

१३७ ज्ञानेन्द्रियाणि—ज्ञानसाधनानीन्द्रियाणि। शब्दग्राहकमिन्द्रियं—श्रोत्रम्, स्पर्शग्राहकमिन्द्रियं—त्वक्, रूपग्राहकमिन्द्रियं—चक्षुः, रसग्राहकमिन्द्रियं—जिह्वा, गन्धग्राहकमिन्द्रियं—घ्राणम्।

शब्दस्पर्शौ तथा रूपरसगन्धा इतीदृशाः ।
पञ्च शब्दादयः प्रोक्ताः क्रमाच्छ्रोत्रादिगोचराः ॥ १३८ ॥
प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।
प्राणाख्याः पञ्च कर्णादौ मुख्या वेदे प्रकीर्तिताः ॥ १३९ ॥
नागः कूर्मस्तथा देवदत्तश्चाथ धनञ्जयः ।
कृकलश्चेति विज्ञेयास्तथा पञ्चोपवायवः ॥ १४० ॥
खं वाय्वग्न्यब्भुवः पञ्च स्थूलभूतानि चैव हि ।
शब्दादिसूक्ष्मभूतानि तन्मात्राख्यानि पञ्च च ॥ १४१ ॥

---

१३८ श्रोत्रग्राह्यो गुणः शब्दः, त्वगिन्द्रियग्राह्यो गुणः स्पर्शः, चक्षुर्ग्राह्यो गुणो–रूपम्, जिह्वाग्राह्यो गुणो–रसः, घ्राणग्राह्यो गुणः–गन्धः ।

१३९ प्राणः–प्राग्गमनवान् (नासाग्रवर्ती) वायुः, अपानः–अर्वाग्गमनवान् (पाय्वादिस्थानवर्ती), व्यानः–विष्वग्गमनवान् (सर्वशरीरवर्ती), उदानः–ऊर्द्ध्वगमनवान् (कण्ठवर्ती), समानः–अशितपीतान्नपानादेः समीकरणकरः (नाभिस्थानवर्ती) । वेदे प्रकीर्तिताः "प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च" "मा मोहमापद्यथ यतोऽहमेवैतत्पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामी"ति छान्दोग्यादौ कीर्तिता इत्यर्थः ।

१४० नागः=उद्गारकरो वायुः, कूर्मः=उन्मीलनकरो वायुः, कृकलः=क्षुत्करो वायुः, देवदत्तो=विजृम्भणकरो वायुः, धनञ्जयः=सर्वदेहव्याप्याऽऽमरणावस्थावस्थो वायुः ।

१४१ खम्–शब्दगुणकम्, वायुः–शब्दस्पर्शगुणः, अग्निः शब्दस्पर्शरूपगुणः, आपः–शब्दस्पर्शरूपरसगुणाः, भूः–शब्दस्पर्शरूपरसगन्धगुणा । स्थूलभूतानि–पञ्चीकृतभूतानि । तन्मात्ररूपिणः=अपञ्चीकृताः, शब्दाद्याः पञ्च–(शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गन्धतन्मात्रं) सूक्ष्मभूतानि ।

अहिंसा सत्यमस्तेयब्रह्मचर्य्यापरिग्रहाः ।
इति पञ्च यमाः प्रोक्ता विज्ञैर्वेदान्तयोगयोः ॥ १४२ ॥
तपःशौचे च सन्तोषः स्वाध्यायश्चेशचिन्तनम् ।
इत्येते नियमाः पञ्च प्रोक्ता वेदान्तवेदिभिः ॥ १४३ ॥
क्षिप्ता मूढा च विक्षिप्तैकाग्रा रुद्धा च पञ्चमी ।
एतास्तु योगिराजानां मताश्चित्तस्य भूमयः ॥ १४४ ॥
नित्यो नैमित्तिकश्चाथ लयो दैनंदिनस्तथा ।
महाँश्चात्यन्तिकस्तद्वत्पञ्चैते प्रलया मताः ॥ १४५ ॥

---

१४२ अहिंसा—प्राणवियोगप्रयोजकव्यापाराराहित्यं, मनसा कर्मणा वाचा वा परपीडाराहित्यम्, सत्यम्—वाङ्मनसोर्यथार्थत्वम्, अस्तेयम्—परस्वाऽनपहरणम्, ब्रह्मचर्य्यम्—उपस्थेन्द्रियसंयमः, अपरिग्रहः—भोगसाधनानामनङ्गीकारः ।

१४३ तपः—मनसश्चेन्द्रियाणां चैकाग्र्यम् । शौचं—शरीरमनसोः शुद्धिः । सन्तोषः—यथालाभं तुष्टिः । स्वाध्यायः—पवित्रमन्त्राणां गुरुमन्त्रस्य वा जपः, ईशचिन्तनम्—ईश्वरप्रणिधानं (सर्वकर्मणां भगवत्यर्पणं, भगवद्भक्तिर्वा) ।

१४४ भूमयः—चित्तस्यावस्थाविशेषाः । क्षिप्ता—चित्तस्य विषयप्रवणावस्था । मूढा—निद्रातन्द्रादिग्रस्तावस्था । विक्षिप्ता—क्षिप्ताद्विशिष्टा (कदाचिद्ध्यानावस्था विषयप्रवणा च कदाचित्) अवस्था । एकाग्रा—सम्प्रज्ञातसमाध्यवस्था । निरुद्धा—असम्प्रज्ञातसमाध्यवस्था (निरुद्धाखिलवृत्तिका) । तत्र क्षिप्तमूढयोः समाधित्वशङ्कैव नास्ति, विक्षिप्ते तु समाधित्वशङ्का, तदितरद्भूमिद्वयं समाधिः ।

१४५ प्रलयः—सकलभावकार्य्यविनाशः । नित्यप्रलयः—प्राणिनां सुषुप्तिः । ("चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते" तत्रैकस्मिन्नहनि चतुर्दशमनूनां

भ्रमाः पञ्च समाख्याताः सर्वानर्थकरास्त्विमे ।
जीवोयं ब्रह्मणो भिन्नः कर्तृत्वादि च वास्तवम् ॥ १४६ ॥
शरीरत्रयसङ्गी चैवात्मा संराजते सदा ।
जगद्धेतुस्तथा ब्रह्म विकारैर्बहुभिर्युतम् ॥ १४७ ॥
कारणाच्च पृथक् सृष्टिः सत्या नैवात्र संशयः ।
इत्येतांस्तु भ्रमाञ्छिन्द्याद्दृष्टान्तैः पञ्चभिः पुमान् ॥ १४८ ॥
प्रतिबिम्बं नचात्यन्तं भिन्नं बिम्बाद्यथा तथा ।
ब्रह्मणो न भिदा जीवे एवं पूर्वभ्रमं त्यजेत् ॥ १४९ ॥
लोहितस्फटिकाख्येन दृष्टान्तेन निवारयेत् ।
कर्तृत्वादेर्यथार्थत्वभ्रमं तद्वद्द्वितीयकम् ॥ १५० ॥
पुरस्कृत्याथ दृष्टान्तं घटाकाशात्मकं तथा ।
शरीरत्रयसङ्गित्वभ्रमं छिन्द्यादुदारधीः ॥ १५१ ॥

चतुर्दशेन्द्राणां चाधिपत्यं परिवर्तते, तत्र) एकस्मिन्मन्वादावपगतेऽपराधिपत्यान्तरालकालः—नैमित्तिकप्रलयः, अयमेव मन्वन्तरप्रलय इत्युच्यते एतेषु युगप्रलयानामन्तर्भावः । ब्रह्मणः सुषुप्तिः—दैनन्दिनप्रलयः । ब्रह्मणो नाशावस्था—ब्रह्मप्रलयः, महाप्रलय इति चोच्यते । अस्मिन्प्रलयेऽज्ञानमेव परिशिष्यते । अज्ञानसहितसकलभावकार्य्योच्छेदः—आत्यन्तिकः प्रलयः ।

१४६ भ्रमलक्षणम् "अतस्मिँस्तद्बुद्धिः"—इत्यादिना पूर्वमाख्यातमेव । 'कर्तृत्वादि च वास्तवम्'—इत्यत्रापि 'जीवे'—इति शेषः ।

१४८ वादिप्रतिवादिनोर्यत्रार्थे बुद्धिसाम्यं स दृष्टान्तः ।

१४९ पूर्वभ्रमम्, जीवब्रह्मणोर्भेदभ्रममित्यर्थः ।

चतुर्थं रज्जुसर्पात्मदृष्टान्तेन प्रतिक्षिपेत् ।
लोहखड्गादिदृष्टान्तैः पञ्चमं चाप्यशेषतः ॥ १५२ ॥
शुक्तौ रूप्यं तथा रज्जौ सर्पः स्थाणौ पुमानथो ।
आकाशे नीलिमा चैव मरीच्यामुदकं तथा ॥ १५३ ॥
इत्येते पञ्च दृष्टान्ता वेदान्तज्ञैरुदाहृताः ।
ब्रह्मण्यस्य प्रपञ्चस्य भ्रान्त्या भाने स्वरूपतः ॥ १५४ ॥
तमो मोहो महामोहस्तामिस्रो ह्यन्धसञ्ज्ञकः ।
पञ्च पर्वाण्यविद्याया विद्यन्ते विदुषां मताः ॥ १५५ ॥
अविद्या चास्मिता रागो द्वेषश्चाभिनिवेशकः ।
नामान्तरेण चाख्याताः पञ्च क्लेशा इमे क्रमात् ॥ १५६ ॥
यद्वाऽविद्याऽस्मिताऽसूया स्पर्द्धा चाभिनिवेशकः ।
पञ्च क्लेशाः स्युरेतांश्च ब्रह्मज्ञानान्निवर्तयेत् ॥ १५७ ॥

---

१५२ चतुर्थम्=जगद्धेतुतया ब्रह्मणो विकारित्वभ्रमम् । "लोहखड्गादि"-इत्यादिपदेन स्वर्णकटकादिदृष्टान्तसङ्ग्रहः । पञ्चमम्=कारणातिरेकेण सृष्टेः सत्यत्वभ्रमम् ।

१५६ पूर्वं मूलाविद्या तूलाविद्या चेत्यविद्या द्विविधा निरूपिता, तदत्र तूलाविद्यैवाविद्याशब्देन याह्या । सा चतुर्विधा,-अनित्ये (=ब्रह्मलोकादिफले) नित्यत्वबुद्धिः, अशुचिषु (स्वशरीरपुत्रभार्य्यादिशरीरेषु) शुचित्वबुद्धि, दुःखे तत्साधने च (स्रक्चन्दनवनितादौ) सुखतत्साधनबुद्धिः । अनात्मनि (देहेन्द्रियादौ) आत्मत्वबुद्धिरिति । अस्मिता-बुद्ध्यादावभेदाभिमानः (सामान्याहङ्कारः), रागः-सुखतत्साधनयोर्गर्धः, द्वेषः-दुःखतत्साधनयोः क्रोधः । स्वीकृतस्य पुनस्त्यागाऽसहिष्णुत्वमभिनिवेशः ।

१५७ स्पर्द्धाऽसूये च लक्षयिष्येते आसुरसंपन्निरूपणवेलायाम् ।

आत्मख्यातिरसत्ख्यातिरख्यातिख्यातिरेव च ।
तथा ख्यातिरनिर्वाच्या ह्यन्यथाख्यातिरप्यथ ॥ १५८ ॥
एवं स्यात्पञ्चधा ख्यातिर्विज्ञानात्मादिवादिनाम् ।
प्रस्तारः पञ्चसञ्ज्ञानामेवमुक्तः समासतः १५९ ॥
(६) समाधिः षड्विधः प्रोक्तो बाह्याभ्यन्तरभेदतः ।
निर्विकल्पस्य चैवाथ दृश्यशब्दानुविद्धयोः ॥ १६० ॥
कामः क्रोधस्तथा लोभो मदमोहौ च मत्सरः ।
गणोऽयमरिषड्वर्गो वेदान्ते परिभाषितः ॥ १६१ ॥

---

१५८ ख्यातिशब्दो भ्रमस्य वाचकः । आत्मख्यातिः—विज्ञानात्मन एवाध्यस्तपदार्थाकारेण भानम् (विज्ञानवादिमते), असत्ख्यातिः—असतः(=शून्यस्य) एवाध्यस्तपदार्थाकारेण भानम् (शून्यवादिमते), अख्यातिः - ख्यातेरेव (=भ्रमज्ञानस्यैव) अभावः–(प्राभाकरमते), अन्यथाख्यातिः—तदभाववति तत्प्रकारकभानम् (भाट्टवैशेषिकमतयोः), अनिर्वचनीयख्यातिः—सदसदादिप्रकारैरनिर्वाच्यस्यैवाध्यस्तपदार्थस्य भानम् (वेदान्तिमते) ।

१६० दृश्यानुविद्धः शब्दानुविद्धो निर्विकल्पश्चेति त्रिविधः समाधिर्बाह्याभ्यन्तरभेदतः षड्विधो भवति, तत्र दृश्यानुविद्धशब्दानुविद्धाख्यौ समाधी पूर्वोक्तसविकल्पसमाधावन्तर्भवतः, तत्र बाह्यदृश्यमिश्रः (बाह्यानां सूर्यादीनां द्रष्टा तेष्वनुस्यूतोऽहमिति) समाधिः- बाह्यदृश्यानुविद्धः । आभ्यन्तरदृश्यमिश्रः (आभ्यन्तराणां क्रोधादीनां द्रष्टा तेष्वनुस्यूतोऽहमिति) समाधिराभ्यन्तरदृश्यानुविद्धः । "बाह्यसूर्यादिभ्योऽसङ्गोऽहम्"—इत्यादिशब्दव्यामिश्रो बाह्यशब्दानुविद्धः, "आन्तरक्रोधादिभ्योऽसङ्गोऽहम्"—इत्यादिशब्दव्यामिश्रः—आन्तरशब्दानुविद्धः, एवं बाह्यदृश्यविषयकविकल्पविधुरः समाधिः—बाह्यनिर्विकल्पः । आभ्यन्तरदृश्यविषयकविकल्पविधुरः—आभ्यन्तरनिर्विकल्पः ।

१६१ कामादयः पूर्वं लक्षिताः लक्षयिष्यन्ते चासुरसंपन्निरूपणावसरे ।

स्युः षड् भावविकाराश्च जनिश्चास्तित्ववर्द्धने।
तथा चापक्षयो नाशः परिणाम इतीदृशाः ॥ १६२ ॥
त्वङ् मांसं रुधिरं मेदो मज्जास्थीनीति भेदतः।
घटिकाः स्थूलदेहस्य हीमाः षट् कोशिका मताः ॥ १६३ ॥
जरा च मरणं चैव क्षुत्पिपासे तथैव च।
शोकमोहाविनीत्येवं समाख्याताः षडूर्मयः ॥ १६४ ॥
उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गषट्कमिदं मतम् ॥ १६५ ॥

---

१६२ जनिः—कार्य्यस्याद्यक्षणसत्तासम्बन्धः, अस्तित्वम्—जातस्य कार्य्यस्य क्षणमवस्थानम्, वर्द्धनम्—शरीरस्य भूयोभिरवयवैः सम्बन्धः, परिणामः—पूर्वरूपापाये रूपान्तरापत्तिः, अपक्षयः—भूयोभिरवयवैर्विश्लेषः, विनाशः—चरमशरीरप्राणसंयोगध्वंसः, इति क्रमशो भावविकाराणां लक्षणम्।

१६३ कोशिकाः=असिकोशवदात्माऽऽवरणानि।

१६४ ऊर्मयः=सागरस्योर्मयः (=लहर्य्यः) इवोर्मयः, चित्तक्षोभकत्वात्।

१६५ लिङ्गत्वम्=लीनस्यार्थस्य (तात्पर्य्यादेः) गमकत्वम्। प्रकरणप्रतिपाद्यस्य आद्यन्तयोः प्रतिपादनम्—उपक्रमोपसंहारावेकं लिङ्गम्। यथा-छान्दोग्ये षष्ठप्रपाठके "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ऐतदात्म्यमिदं सर्वम्"—इत्यद्वितीयवस्तुन आद्यन्तयोः प्रतिपादनम्। प्रकरणप्रतिपाद्यस्य पुनःपुनः प्रतिपादनमभ्यासः। यथा तत्रैव "तत्त्वमसी"ति नवकृत्वोऽभ्यासः, प्रकरणप्रतिपाद्यस्य मानान्तराऽविषयता—अपूर्वता, यथा तत्रैव "तन्त्वौपनिषदं पुरुषं पृच्छामी"त्यद्वितीयवस्तुन उपनिषदतिरिक्तमानाविषयता। प्रकरणप्रतिपाद्यस्य श्रूयमाणं तज्ज्ञानात्तत्प्राप्तिप्रयोजनम्—फलम्, यथा तत्रैवा"ऽथ सम्पत्स्य" * इत्यद्वितीयज्ञानात्तत्सम्पत्तिरूपं फलम्। प्रकर-

* सम्पत्स्य इति छान्दसः प्रयोगः सम्पत्स्यते विदेहमुक्तो भवतीत्यर्थः।

शिशुत्वं बाल्यकौमारे कैशोरं यौवनं तथा ।
वार्द्धक्यं चेतिभेदेन षडवस्थाः प्रकीर्त्तिताः ॥ १६६ ॥
वैशेषिकं तथा न्यायशास्त्रं साङ्ख्याऽभिधं तथा ।
योगशास्त्रं च मीमांसे शास्त्राण्येवं विदुर्बुधाः ॥ १६७ ॥
वैखानसं च सत्याषाढीयं कात्यायनं तथा ।
सूत्रं बौद्धायनं तद्वच्चापस्तम्बाश्वलायने ॥ १६८ ॥
षट् सूत्राण्येवमेतानि निर्म्मितानि महर्षिभिः ।
स्वल्पाक्षरैरनल्पार्थसूचकानि पृथक् पृथक् ॥ १६९ ॥

णप्रतिपाद्यस्य प्रशंसनमर्थवादः, यथा तत्रैव "येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि"त्यद्वितीयवस्तुप्रशंसनम् । स चार्थवादस्त्रिविधः—गुणवादोऽनुवादो भूतार्थवादश्चेति । तत्र मानान्तरविरुद्धार्थप्रतिपादकत्वं—गुणवादो यथा "आदित्यो यूपः"—इत्यादि, उक्तस्य पुनर्वचनमनुवादो यथा "जुहोति जुहोती"त्यादि, प्रमाणान्तरपरिप्राप्तार्थाभिधायित्वं भूतार्थवादो यथा "अग्निर्हिमस्य भेषजमि"ति । प्रकरणप्रतिपाद्यस्य दृष्टान्तैः प्रतिपादनमुपपत्तिः यथा तत्रैव "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि"त्यादिना मृदादिदृष्टान्तैरद्वितीयवस्तुप्रतिपादनम् । एभिः षड्विधैर्लिङ्गैः शास्त्राणां तत्तद्वस्तुनि तात्पर्य्यमध्यवसीयते, यथा पूर्वोक्तरीत्योपनिषदामद्वैते इति ध्येयम् ।

१६६ शिशुत्वं=आदन्तजननात्, कौमारम्=पञ्चवर्षान्तम्, कैशोरम्—आपञ्चदशाब्दात्, बाल्यं=दशवर्षान्तं, यौवनं=षोडशाब्दात्परं, षष्टिवर्षात्परं च वार्द्धक्यमिति बोध्यम् ।

१६७ शास्त्रत्वं=हितशासकत्वम् । मीमांसे, पूर्वमीमांसोत्तरमीमांसे इत्यर्थः ।

१६८ सूत्रत्वम्—अल्पाक्षरत्वे सति बह्वर्थसूचकत्वम् ।

शिक्षा व्याकरणं ज्योतिश्छन्दःकल्पनिरुक्तयः ।
एतानि स्युः षडङ्गानि वेदराशेर्निजाङ्गिनः ॥ १७० ॥
स्नानं सन्ध्या जपो होम आतिथ्यं देवतार्चनम् ।
वैश्वदेवस्तथैतानि प्राहुः कर्माणि षड् बुधाः ॥ १७१ ॥
पूर्वोक्तानि प्रमाणानि चत्वारि द्वे च नूतने ।
आक्षेपाऽनुपलम्भाख्ये षट् सम्भूय भवन्ति हि ॥ १७२ ॥

---

१७० शिक्षा=ह्रस्वदीर्घादिवैदिकस्वरोच्चारणप्रतिपादकं शास्त्रं, कल्पः=यज्ञपात्रनिर्माणप्रकारप्रतिपादकं शास्त्रं, निरुक्तं=वैदिकपदानां पर्यायव्युत्पत्त्यादिप्रतिपादकं शास्त्रम् ।

१७१ वैश्वदेवः=अग्निपितृगोश्वकाकादिभ्यो मन्त्रविशेषेण दीयमानो बलिः, । कर्माणि=त्रैवर्णिकानां नित्यानि कर्माणीत्यर्थः ।

१७२ प्रत्यक्षानुमानोपमानशब्दाश्चत्वार्य्येतानि पूर्वोक्तप्रमाणानि तथा आक्षेपः=अर्थापत्तिः, अनुपलम्भः=अनुपलब्धिः, इति षट्प्रमाणानि, प्रत्यक्षानुमाने तु पुरोक्ते, अर्थापत्तिः–अनुपपद्यमानार्थज्ञानात्तदुपपादकीभूतार्थान्तरकल्पनम् । सा च द्विविधा–दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेत्ति, तत्राऽनुपपद्यमानदृष्टार्थज्ञानात्तदुपपादकीभूतार्थान्तरकल्पनं–दृष्टार्थापत्तिः, यथा दिवाऽभोजिदेवदत्ते रात्रिभोजनमन्तरानुपपद्यमानपीनत्वदर्शनात्तदुपपादकीभूतस्यार्थान्तरस्य (रात्रिभोजनस्य) कल्पनम्, तत्र पीनत्वज्ञानं करणं रात्रिभोजनकल्पनं च फलम् । अनुपपद्यमानार्थश्रवणात्तदुपपादकीभूतार्थान्तरकल्पनं–श्रुतार्थापत्तिः । सापि द्विविधा–अभिधानानुपपत्तिरभिहितानुपपत्तिश्चेति, तत्रानुपपद्यमानवाक्यैकदेशश्रवणात्तदुपपादकीभूतार्थान्तरकल्पनमभिधानानुपपत्तिः, यथा 'द्वारमि'त्यस्य वाक्यैकदेशस्य पिधेहीति पदार्थान्तरकल्पनमन्तराऽनुपपत्त्या तत्कल्पनम् । अनुपपद्यमानसमग्रवाक्यश्रवणात्तदुपपादकीभूतार्थान्तरकल्पनमभिहिताऽनुपपत्तिः, यथा "तरति

आत्माश्रयाऽभिधो दोषो दोषोऽन्योन्याश्रयस्तथा ।
चक्रकं चानवस्था च प्राग्लोपश्च तथाविधः ॥ १७३ ॥
दोषोऽविनिगमाख्योथ षडेते प्रतिवादिनाम् ।
आत्माश्रयादयो दोषा उत्पत्तिस्थितिवित्तिषु ॥ १७४ ॥

शोकमात्मविदि" ति प्रमातृत्वादिबन्धस्य शोकोपलक्षितस्य ज्ञाननिवर्त्यत्व श्रवणाच्छोकस्य मिथ्यात्वमन्तरानुपपद्यमानाच्छोकस्य मिथ्यात्वकल्पनं यथा वा "ज्योतिष्टोमेन स्वर्गकामो यजेते" त्यादिवाक्यश्रवणाददृष्टस्य प्रकल्पनमिति । तत्रापि अनुपपद्यमानार्थश्रवणं करणम् (प्रमाणं)—तदुपपादकस्य मिथ्यात्वादेः कल्पनं च फलं (प्रमा) अनुपलब्धिप्रमाणं च योग्यानुपलब्धिरूपं ग्राह्यं, तच्चाऽभावप्रमां प्रति करणं । योग्यानुपलब्धिर्नाम—अभावप्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितोपलब्धिरूपप्रतियोगिकानुपलब्धिः, यथा भूतले घटो नास्तीतिप्रतीतिसिद्धघटाभावप्रतियोगिनो घटस्य यद्यत्र घटः स्यादितिप्रसञ्जनेन (आपादनेन) तर्ह्युपलभ्येदिति प्रसञ्जितोपलब्धिरूपप्रतियोगिका घटस्यानुपलब्धिस्तया भूतले घटाभाव प्रमा जायते परोक्षधर्मिकं सादृश्यज्ञानजन्यं ज्ञानम् (एतद्दृष्टगवयसदृशी मदीया गौरिति)—उपमितिः प्रमा, तत्करणं प्रत्यक्षगवयादिधर्मिकं सादृश्यज्ञानं तूपमानप्रमाणम् । वैधर्म्यज्ञानाच्च नोपमितिः । वाक्यकरणिका प्रमा शाब्दी, सा द्विविधा लौकिकी वैदिकी चेति; तत्करणं वाक्यं तु शब्दप्रमाणम् । एवं प्रत्यक्षादीनि षट् प्रमाणानि तज्जन्याश्च प्रत्यक्षानुमित्युपमितिशाब्दयर्थापत्त्यभावरूपाः षडेव प्रमा बोद्धव्याः ।

१७४ केचिदेष्वेवात्माश्रयादिषु प्रमाणाभावमधिकं संयोज्य सप्तात्माश्रयादीन् दोषान् वदन्ति । तत्रात्माश्रयः—स्वस्याव्यवहितस्वापेक्षित्वम् । अन्योन्यस्याऽव्यवहिताऽन्योन्यापेक्षित्वम्—अन्योन्याश्रयः । व्यवहितस्य तदेव द्वयम् (आत्माश्रयान्योन्याश्रयौ,) त्रितयादिसिद्धावव्यवधानेन त्रितयाद्यपेक्षा वा—चक्रकम् । उपपाद्योपपादकप्रवाहोऽनवधिरनवस्था, सा च द्विविधा—

अधो धावन्ती, ऊर्द्ध्वं धावन्ती चेति। तत्राऽधो धावन्ती यथा घटजनने कपालाऽपेक्षा कपालजनने कपालिकायास्तज्जनने च तदवयवानामपेक्षा एवं तत्र तत्रेति। ऊर्द्ध्वं धावन्त्यनवस्था यथा 'भेदः किं भिन्ने धर्मिणि वर्त्ततेऽभिन्ने वा आद्येऽपि केन भेदेन भिन्ने कस्य भेदस्याऽवस्थितिः?'—इतिप्रश्ने 'द्वितीयभेदभिन्ने धर्मिणि प्रथमस्य, तृतीयभेदभिन्ने द्वितीयस्य, चतुर्थभेदभिन्ने तृतीयस्य, एवं तत्र तत्रापि'—इत्यङ्गीकारे। प्रागलोपो नाम—उत्तरोत्तरेणैव पूर्वपूर्वकार्य्यसम्भवे पूर्वेषामन्यथासिद्धिः। एकतरपक्षपातियुक्तिविरहः—विनिगमनाविरह इति, विविच्य निर्णीतश्चायमर्थोऽस्माभिर्दोषदूषकतामूलनिर्णयग्रन्थे ऽथाप्यात्माश्रयादीनामत्यन्तमुपयुक्तत्वाद्वेदान्तग्रन्थेषु तत्स्पष्टीकरणार्थमिहैवाधश्चित्रं प्रकल्प्योपन्यस्तम्—चिन्त्यतामस्मिंश्चित्रे क–ख–ग–घ–ङादिबिन्दुस्थानीया भेदाः, परिधिश्च भेदाश्रयः; तत्र यदि क–भेदभिन्ने धर्मिणि क–भेदो वर्त्तेत तदा स्वस्याऽव्यवधानेन स्वापेक्षणादात्माश्रयः। अथ ख–भेदभिन्ने क–भेदो वर्त्तेत तदा ख–भेदस्यापि भेदत्वात् क–भेदवद्भिन्ने धर्मिण्येव वृत्तिर्वाच्या तथाच ख–भेदेनैव भिन्ने ख–भेदवृत्तौ तथैवात्माश्रयः, क–भेदेन भिन्ने तद्वृत्तावन्योन्याश्रयः, अन्योन्यस्याऽव्यवधानेनान्योन्याऽपेक्षितत्वात्।

यदि त्वेतद्दोषद्वयपरिजिहीर्षया ग–भेदभिन्ने ख–भेदस्थितिरङ्गीक्रियेत तदा ग–भेदस्यापि तथैव भेदत्वेन भिन्ने एव धर्मिणि वृत्तेर्वक्तव्यतया स्वेनैव (=ग–भेदेन) भिन्ने स्ववृत्तौ (=ग–भेदवृत्तौ) आत्माश्रयः, ख–भेदेन भिन्ने तद्वृत्तावन्योन्याश्रयः, क–भेदेन भिन्ने वृत्तौ च चक्रकम्। अथ न क–भेदेन, न च ख–भेदेन, नापि च ग–भेदेन, भिन्ने ग–भेदस्थितिः किं तर्हि? घ–भेदेनेति चेत्तर्हि घ–भेदस्यापि भेदत्वेन भिन्ने एव वृत्तेरावश्यकतया घ–भेदभिन्ने घ–भेदवृत्तावात्माश्रयः, ग–भेदभिन्ने वृत्तावन्योन्या-

शमो दमस्तितिक्षा च श्रद्धा चोपरतिस्तथा ।
समाधानमिदं ज्ञेयं षड्विधं हि शमादिकम् ॥ १७५ ॥
अजिह्वः षण्ढकः पङ्गुरन्धो बधिर एव च ।
मुग्धश्चैते सुविज्ञेयाः षड् भूमौ भिक्षुपुङ्गवाः ॥ १७६ ॥

श्रयः, क-भेदभिन्ने वृत्तौ चक्रकम्, ङ-चाद्युत्तरोत्तरभेदेन भिन्ने घ-ङादिभेदवृत्तौ चानवस्था, भेद्यभेदकप्रवाहस्यावध्यभावात् । अथाऽनवस्थाप्याश्रीयते तर्हि ङ-चाद्युत्तरोत्तरभेदेनैव घ-ङादिभेदप्रयोजनस्य(-धर्मिणि भिन्नत्वव्यवहारस्य) सिद्धौ प्राग्लोपः। यदि ङ-भेदे, च-भेदेऽन्यस्मिन्वा कुत्रचिद्वत्वा स्वेनैव भिन्ने स्वावस्थितिरङ्गीक्रियेत तदा विनिगमनाविरहः, तत्रैव (ङ-चादिभेदे) विरामो न चान्यत्र (घ-गादौ) इत्यत्र नियामकयुक्त्यभावात् । तथाऽनवस्याङ्गीकारे प्रमाणाऽभावश्च, नहि तादृशानन्तानन्तभेदप्रवाहः कस्यचिदनुभवस्य विषय इत्यनुसन्धेयम् । एवं क-भेदस्वीकारे केवलमात्माश्रयः, ख-भेदाभ्युपगमे आत्माश्रयाऽन्योन्याश्रयौ, ग-भेदाङ्गीकारे आत्माश्रयान्योन्याश्रयचक्रकाणि त्रीणि, घ-ङादीतरभेदाश्रयणे चात्माश्रयान्योन्याश्रयचक्रकानवस्थाप्राग्लोपविनिगमनाविरहप्रमाणाभावाख्यानि सप्त दूषणानि शास्त्रसमयाद्यथायथं द्रष्टव्यानीत्यलमतिविस्तरेण ।

१७५ शमः-अन्तरिन्द्रिय * निग्रहः । दमः-बाह्येन्द्रियनिग्रहः । तितिक्षा-शीतोष्णादिद्वन्द्वसहिष्णुता । श्रद्धा-गुरुवेदान्तवाक्येषु विश्वासः । उपरतिः-संन्यासः । समाधानं-श्रवणादिषु चित्तैकाग्र्यम् ।

१७६ अजिह्वत्वादयस्तु शास्त्रकारैर्लक्षिताः-"इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जते। हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते ॥ १ ॥ अद्य जातां यथा नारीं तथा षोडशवार्षिकीम् । शतवर्षां च यो दृष्ट्वा निर्विकारः स षण्ढकः ॥ २ ॥ भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च । योजनान्न परं याति सर्वथा पङ्गुरेव सः ॥ ३ ॥ तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम् । चक्षु-

* अन्तरिन्द्रियं=मनः ।

कुलं शीलं च वित्तं च रूपं यौवनमेव च।
विद्या राज्यं तपश्चैषां कीर्तिताः षड् बहिर्मदाः ॥ १७७ ॥
जातिवर्णाश्रमाणां च गोत्रनाम्नोः कुलस्य च।
अभिमानात्मकाः षट् स्युर्भ्रमा वेदान्तकीर्त्तिताः ॥ १७८ ॥
श्वेतं पीतं तथा कृष्णं माञ्जिष्ठं हरितं तथा।
रक्तं चापीतिभेदेन रूपं स्याद् षड्विधं मतम् ॥ १७९ ॥
कट्वम्ललवणा मिष्टस्तिक्तः कषायसञ्ज्ञकः।
एवंभेदाद्रसः प्राज्ञैः षड्विधः परिकीर्त्यते ॥ १८० ॥
ऐश्वर्य्यं श्रीर्यशो वीर्य्यं ज्ञानं वैराग्यमेव च।
एतद्वेदान्तिकैः प्रोक्तमैश्वर्य्यादीह षड्विधम् ॥ १८१ ॥
उत्पत्तिर्निधनं चैव भूतानामगतिर्गतिः।
विद्याऽविद्या तथैतत्स्यादुत्पत्त्यादीह षड्विधम् ॥ १८२ ॥

युगं भुवं त्यक्त्वा परिव्राट् सोन्ध उच्यते ॥ ४ ॥ हिताहितं मनोरामं वचः शोकावहं च यत्। श्रुत्वापि यो न शृणुते बधिरः स प्रकीर्तितः ॥ ५ ॥ सान्निध्ये विषयाणां च समर्थोऽविकलेन्द्रियः। सुप्रवद्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यते" ॥ ६ ॥ इति।

१७९ रूपम्—चक्षुर्मात्रग्राह्यो गुणः।

१८० रसः—रसनेन्द्रियमात्रग्राह्यो गुणः। कटुः—निम्बादीनाम्। तिक्तः—मरीच्यादीनाम्। कषायः—हरीतक्यादीनाम्।

१८१ ऐश्वर्यादिषट्कमेव भगशब्देनापि परिभाषितं, यत्सम्बन्धाचारायणो 'भगवान्'—इत्युच्यते।

१८२ भूतानां=प्राणिनाम्, अगतिः=मोक्षाभावः (अनिष्टसम्बन्ध इति यावत्), गतिः=मोक्षः (=इष्टसम्बन्ध इति यावत्), विद्या=मोक्षसाधनीभूतं तत्त्वज्ञानम् माया वा, अविद्या=अनिष्टसाधनम् अतत्त्वज्ञानम्। एतदुत्पत्त्यादिकमपि पक्षान्तरे भगसञ्ज्ञकम्।

एवं तु षड्विधाः सञ्ज्ञाः सञ्ज्ञामात्रेण कीर्तिताः ।
कीर्त्यन्ते सप्त सप्ताथ सञ्ज्ञा वेदान्तबोधिताः ॥ १८३ ॥
(७)अज्ञानावृतिविक्षेपद्विविधज्ञानतृप्तयः ।
दुःखहानिश्च सप्तैता अवस्थाः परिकीर्तिताः ॥ १८४ ॥
शुद्धमीश्वरचैतन्यं जीवचैतन्यमेव च ।
प्रमाता च प्रमाणं च प्रमेयं च फलं तथा ॥ १८५ ॥
एवं सप्तविधं चैव चैतन्यं प्रोच्यते बुधैः ।
तत्त्वतस्त्वेकमेवापि नानोपाध्युपरञ्जितम् ॥ १८६ ॥
भूर्भुवः स्वर्महर्लोको जनलोकस्तपस्तथा ।
सत्यं चेत्यथ भूरादिसप्तकं समुदाहृतम् ॥ १८७ ॥
अतलं वितलं सुतलं तलातलं किल रसातलं चैव ।
पातालसप्तकमिदं महातलं चापि पातालम् ॥ १८८ ॥

---

१८४ द्विविधज्ञानेति, परोक्षं चापरोक्षं चेति द्विविधं ज्ञानम् । तत्र विषयचित्तादात्म्याऽनापन्नं प्रमाणचैतन्यं परोक्षज्ञानम्, विषयचित्तादात्म्यापन्नं तु अपरोक्षज्ञानम् । तत्र परोक्षज्ञानेन 'आत्मा नास्ती'त्यादिरूपस्यासदावरणस्य निवृत्तिः, अपरोक्षज्ञानेन तु आत्मा न भातीत्यादिरूपस्याभानावरणस्याज्ञानांशस्य निवृत्तिरित्युक्तमेव प्राक् ।

१८५ शुद्धम्–निरवच्छिन्नचैतन्यम् । ईश्वरः–मायोपहितं चैतन्यम् । जीवः–अविद्योपहितं चैतन्यं । प्रमातृचैतन्यम्–अन्तःकरणावच्छिन्नं चैतन्यम् । प्रमाणचैतन्यमन्तःकरणवृत्त्यवच्छिन्नं चैतन्यम् । अज्ञातं घटाद्यवच्छिन्नचैतन्यं–प्रमेयचैतन्यं (= विषयचैतन्यम्), ज्ञातं घटाद्यवच्छिन्नचैतन्यम् अन्तःकरणवृत्त्यभिव्यक्तं * चैतन्यं वा–फलचैतन्यम् ।

---

* अन्तःकरणवृत्त्यभिव्यक्तं=घटादिविषयचैतन्याभिन्नमन्तःकरणवृत्तिप्रतिबिम्बितं चैतन्यम् ।

बीजजाग्रत्तथा जाग्रन्महाजाग्रत्तथैव च ।
जाग्रत्स्वप्नस्तथा स्वप्नः स्वप्नजाग्रत्सुषुप्तिके ॥ १८९ ॥
एवंभेदात्समाख्याताः सप्ताज्ञानस्य भूमयः
भूमयः सप्त तद्वत्स्युर्ज्ञानस्योक्ता महर्षिभिः ॥ १९० ॥
शुभेच्छाख्या तु तत्राद्या ज्ञानभूमिः प्रकीर्तिता ।
विचारणा द्वितीया तु तृतीया तनुमानसा ॥ १९१ ॥

---

१८९ बीजजाग्रदादयश्चेत्यमन्यत्र लक्षिताः "कुसूले संस्थितं बीजं तत्र सर्वो यथा द्रुमः । तथा यत्र स्थितं विश्वं न तु व्यक्तिमुपागतम् । बीज-रूपं स्थितं जाग्रद्बीजजाग्रत्तदुच्यते । संसारप्रथमाऽवस्था महामोहः स एव हि । तदेवाज्ञानमित्युक्तं यत्स्वबोधेन लीयते । कुसूले संस्थितं बीजं क्षेत्रे निक्षिप्यते यदा । अङ्कुरोन्मुखतां याति साऽवस्था जाग्रदुच्यते । इदमेव महत्तत्त्वमिति साङ्ख्यैर्निरूप्यते । ईक्षणं चेति वेदान्तैः सामान्याहङ्कृतिस्त-था । आनन्दमयकोशश्च तत्साक्षी त्वीश्वरः स्मृतः । विशेषाहङ्कृतिः सूक्ष्मा-ङ्कुरवद्व्यावहारिकी । महाजाग्रद्बुधैः प्रोक्ता व्यष्ट्यवस्यात्रये तु सा । जाग्र-त्स्वप्नसुषुप्त्याख्येऽवस्था जाग्रदिति स्मृता । जाग्रदेव यदा जीवो मनोराज्यं करोति हि । जाग्रतः स्वप्न इव यत्स जाग्रत्स्वप्न उच्यते । लोकप्रसिद्धो यः स्वप्नः स स्वप्न इति कथ्यते । जातेपि जागरे जन्तोः स्वप्नदृष्टार्थभासनम् । प्रत्यक्षमिव संस्कारात्स्वप्नजाग्रत्तदुच्यते । षडवस्थापरित्यागे सुषुप्तिः सप्त-मी मता"-इति ।

१९१ नित्यानित्यवस्तुविवेकादिपुरःसरा फलपर्यवसायिनी मोक्षेच्छा-शुभेच्छा । गुरुमुपसृत्य वेदान्तवाक्यविचारात्मकश्रवणमननात्मिका वृत्तिः सुविचारणा । निदिध्यासनाभ्यासेन मनस एकाग्रतया सूक्ष्मवस्तुग्रहणयोग्य-ता-तनुमानसा । एतदेव भूमिकात्रयं स्फुटं भेदविषयकत्वेन जाग्रत्तुल्यत्वात् जाग्रदुच्यते । एतस्मिन्नवस्थात्रये ज्ञानोत्पादनयोग्यतामात्रं सम्पद्यते न च

सत्त्वापत्तिश्चतुर्थी स्यादसंसक्तिश्च पञ्चमी ।
पदार्थाऽभावनी षष्ठी सप्तमी चाथ तुर्य्यगा ॥ १९२ ॥
मौनं योगासनं योगस्तितिक्षैकान्तशीलता ।
निःस्पृहत्वं समत्वं च भवेन्मौनादिसप्तकम् ॥ १९३ ॥
रसो रुधिरमांसे च मेदो मज्जाऽस्थिरेतसी ।
धातवः सप्तधैते स्युः स्थूलदेहसमाश्रयाः ॥ १९४ ॥

ज्ञानमुत्पद्यते, ज्ञानभूमिकात्वं तु ज्ञानेतरकर्माद्यनधिकारित्वे सति ज्ञानस्यैवाधिकारित्वादिति बोध्यम् ।

१९२ निर्विकल्पकब्रह्मात्मैक्यसाक्षात्कारः–सत्त्वापत्तिः । स्वप्नवज्जगतो मिथ्यात्वेन स्फुरणात् स्वप्न इति चोच्यते । सविकल्पकसमाध्यभ्यासेन निरुद्धे मनसि निर्विकल्पकसमाध्यवस्था–असंसक्तिः, सुषुप्तिवद्वैतादेर्विस्मरणात् सुषुप्तिरिति चोच्यते । अस्यामवस्थायां योगी स्वयमेव व्युत्तिष्ठते । असंसक्तिभूमिकाभ्यासपाटवाच्चिरं प्रपञ्चाऽपरिस्फूर्त्यवस्था–पदार्थाभावनी, गाढसुषुप्तिरिति चोच्यते । अस्यामवस्थायां परप्रयत्नेन योगी व्युत्तिष्ठते । ब्रह्मध्यानावस्थस्य पुनः पदार्थान्तराऽपरिस्फूर्तिस्तुरीया, अस्यामवस्थायां योगी न स्वतो नापि परकीयप्रयत्नेन व्युत्तिष्ठते केवलं ब्रह्मीभूत एव भवति । एताः सत्त्वापत्त्याद्याश्चतस्रो भूमिका एव ब्रह्मविद्-ब्रह्मविद्वर-ब्रह्मविद्वरीयो-ब्रह्मविद्वरिष्ठेत्येतैर्नामभिर्यथाक्रमेण पूर्वं व्याख्याताः ।

१९३ मौनम्–वाक्संयमः, योगासनं–स्थिरसुखमासनम, योगादिकं च प्राक् लक्षितमेव, समत्वं–सर्वत्र ब्रह्मदर्शित्वं मित्रारिपक्षयोरपक्षपातित्वं वा । एतन्मौनादिकं नित्यमेकदण्डिनाऽनुष्ठेयम् ।

१९४ रसादयः शरीरधारणाद्धातवः । रसः=भुक्तान्नपरिणामः, मेदः=स्थौल्यहेतुभूतः कश्चन धातुविशेषः । मज्जा=अस्थ्यन्तर्गतः श्वेतश्चिक्कणो धातुविशेषः । रेतो=वीर्य्यम् ।

ब्रीह्यादिकं तथा दर्शपूर्णमासावथो मनः ।
प्राणाः क्षीरं च वाक् चैव स्यादन्नं सप्तधा मतम् ॥ १९५ ॥
वामदक्षिणयोर्युग्मं चक्षुषोः श्रोत्रयोस्तथा ।
नासिके द्वे मुखं प्राणाः शीर्षण्याः समुदाहृताः ॥ १९६ ॥
उत्साहव्यसनं तद्वद्विश्वव्यसनमेव च ।
व्यसनं सेवकस्याथ मनोराज्यधनात्मनाम् ॥ १९७ ॥
इति सप्तविधं प्रोक्तं व्यसनं ज्ञाननाशनम् ।
सर्वदैतत्तु संत्याज्यं न्यासिना सुखमिच्छता ॥ १९८ ॥
(८)ज्ञानेन्द्रियाणि पञ्चाथ पञ्च कर्मेन्द्रियाणि च ।
प्राणादिपञ्चकं चान्तःकरणं च चतुर्विधम् ॥ १९९ ॥
सूक्ष्मभूतानि पञ्चाथ पञ्च कर्मेन्द्रियाणि च ।
कामः कर्म तमश्चैतन्मतं पुर्य्यष्टकाभिधम् ॥ २०० ॥

---

१९५ ब्रीह्यादिकं मर्त्यानां सर्वेषां साधारणमन्नं, यदिदमद्यते । दर्शः अमायां क्रियमाणो यज्ञविशेषः, पूर्णमासश्च पूर्णिमायां क्रियमाणः, एतौ द्वौ यज्ञौ देवानामन्नम् । क्षीरम् (=दुग्धं) पशूनां वत्सादीनामन्नम् । मनो वाक् प्राणाश्चेत्यन्नत्रयं चात्मनः (=जीवस्य) साक्षादुपभोज्यमन्नम् ।

१९७ नृत्यगीतादिदर्शनेच्छाहेतुर्व्यसनम्–उत्साहव्यसनम्, गृहक्षेत्रादि-सम्पादनेच्छाहेतुर्विश्वव्यसनम्, परराष्ट्राभिभवादीच्छया सेवकवृद्ध्यर्थेच्छा-हेतुर्व्यसनं–सेवकव्यसनम् । मनोराज्यधनात्मनाम्–मनोव्यसनं राज्यव्यसनं धनव्यसनम् आत्मनः=तनोः (=शरीरस्य) च व्यसनमित्यर्थः । तत्र चौर्य्या-दीच्छाहेतुभूतं व्यसनं–मनोव्यसनं, शरीरपुष्ट्याद्यर्थं रसायनभक्षणादीच्छा-हेतुर्व्यसनं–तनुव्यसनं, शेषमतिरोहितम् ।

२०० कामो रागः, कर्म च त्रिविधं सञ्चितागामिप्रारब्धरूपं प्रागुदीरि-

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं स्याद्भिन्ना प्रकृतिरष्टधा ॥ २०१ ॥
यमश्च नियमश्चैव प्राणायामस्तथैव च ।
प्रत्याहारासने ध्यानधारणाङ्गसमाधयः ॥ २०२ ॥
योगाङ्गान्येवमष्टौ स्युस्तथाष्टाङ्गानि मैथुने ।
दर्शनं स्पर्शनं केलिः कीर्तनं गुह्यभाषणम् ॥ २०३ ॥
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ।
एतानि मैथुनाङ्गानि त्याज्यानि ब्रह्मचारिभिः ॥ २०४ ॥

तम् । तमः=कार्य्याविद्या, अनित्याशुचिदुःखानात्मसु नित्यसुचिसुखात्मख्यातिरूपा प्रागुक्ता द्रष्टव्या ।

२०२ यमादयः पूर्वं निरूपिताः । ध्यानधारणाङ्गसमाधीनामयं भेदः,–ध्यानम्–अन्तराऽन्तरा वृत्त्यन्तरवती प्रत्ययैकतानता (=सजातीयप्रत्ययप्रवाहः) । धारणा–मूलाधार-स्वाधिष्ठान-मणिपूरका-ऽनाहत-विशुद्धा-ऽऽज्ञाचक्रदेशानामन्यतरस्मिन्प्रत्यगात्मनि वा चित्तस्थापनम् । अङ्गभूतः समाधिः–अन्तरान्तरा वृत्त्यन्तराभाववती प्रत्ययैकतानता । अङ्गिभूतसमाधौ (=योगे) अशेषविशेषधर्मपुरस्कारेण ध्येयवस्तुसाक्षात्कारः, अङ्गसमाधौ तु न तथेति विशेषस्तयोर्द्रष्टव्यः ।

२०३ दर्शनम्–रागपूर्वकं स्त्र्यादिविषयकज्ञानम् । स्पर्शनम्–रागपूर्वकं क्रियाविशेषजन्यं ज्ञानम् । केलिः–रागादिपूर्वकः परिहासादिव्यवहारः । स्त्र्यादेरनुरागपूर्वकं सौन्दर्य्यादिवर्णनं–कीर्तनम् । रागपूर्वकं रहसि सम्भाषणं–गुह्यभाषणम् ।

२०४ स्त्र्यादिविषयक 'इदमस्तु'–इति दृढेच्छाविशेषः सङ्कल्पः । 'अनया रमे'–इति निश्चयः–अध्यवसायः । रागपूर्वको व्यवायः–क्रियानिर्वृत्तिः ।

धूमिनी क्रोधिनी मोहिनी स्थितिन्यतिचारिणी ।
वाहिनी वर्त्तिनी चैतेऽन्तर्मदाः कृतिनीयुताः ॥ २०५ ॥
भूमिरापोऽनलो वायुः खं सूर्य्यश्च शशी तथा ।
आत्मा चेत्यष्टमूर्त्तीनामष्टौ मदा उदीरिताः ॥ २०६ ॥
घृणा शङ्का भयं लज्जा जुगुप्सा पञ्चमी तथा ।
कुलं शीलं तथा वित्तमष्टौ पाशाः प्रकीर्त्तिताः ॥ २०७ ॥

---

२०५ धूमिन्यादीनां लक्षणं तु ग्रन्थान्तरादवगन्तव्यम् ।

२०६ भूमिमदः—तमोगुणभरितस्य वस्त्रादीच्छाहेतुर्मदः । संसारभरितस्य ममेदमावश्यकमितिचिन्ताहेतुर्मदः—सलिलमदः । कामरसभरितस्य वनितासम्भोगेच्छया तदनुकूलव्यापारहेतुः—पावकमदः । चिन्ताभरितस्य करिष्यमाणं कार्य्यं भविष्यति न वेत्यादिसंशयात्तूष्णींभावहेतुर्मदः—शशिमदः । प्रयाणभरितस्य परदेशेच्छाहेतुर्मदः—पवनमदः । वाहनभरितस्य गजाश्वादीच्छाहेतुर्मदः—आकाशमदः । क्रोधाग्निभरितस्येदं संहर्तव्यमितीच्छाहेतुर्मदः—सूर्य्यमदः । अहङ्कारभरितस्य विद्यादिभिर्मम समः को वेतिप्रज्ञाहेतुर्मदः—आत्ममद इति विवेकः ।

२०७ घृणा=दया, सापि क्वचिद् जडभरतस्य मृगशावके इव जन्मान्तरसम्पादकत्वात्पाशैव । शङ्का=पूर्वोक्तः संशयः, ब्रह्मात्मतत्त्वज्ञानं मया सम्पादितं ममानर्थनिवारकं भविष्यति नवेत्यादिरूपः, सोपि ब्रह्मज्ञानार्थप्रवृत्तौ पाशैव प्रतिबन्धकत्वात्पाशैव । भयम्=आगामिदुःखानुसन्धानजन्यो मनस उद्वेगः, सोपि पाशैव, ब्रह्मज्ञानाद्यतीवायाससाध्यं ममेत्येवं संचिन्त्योद्विग्नमनसो ब्रह्मज्ञानादिसाधनेऽप्रवर्तकत्वात् । लज्जाऽपि ब्रह्मज्ञानार्थयतनेऽहोऽयमतीव भक्तो बकध्यायीति मां लोका वदेयुरित्यपि पाशैव । जुगुप्सा=निन्दा, ब्रह्मज्ञानेन क्षुल्लकेन किं स्याच्च किमपीत्यादिरूपा स्फुटं तद्विषयेऽप्रवर्तकत्वात्पाशैव । तथाऽतिकुलीनस्य (=कुटुम्बिनः) मम संन्यासाश्रममवलम्ब्याधुनैव ब्रह्मज्ञानादिसम्पादने पुत्राद्यु-

(९) ज्ञातृज्ञाने च ज्ञेयं च भोक्तृभोग्ये च भोजनम् ।
कर्त्ता च करणं कर्म संसारो नवधा भवेत् ॥ २०८ ॥
ज्ञानेन्द्रियाणि च तमश्च तथाप्यवस्थाः ।
कर्मेन्द्रियाणि मनआदिचतुष्टयं च ।
प्राणादिपञ्चकमथो वियदादिकं च ।
कर्माणि देह इति वा नवधाऽन्यपक्षे ॥ २०९ ॥

द्वाहः कथं स्यादितिचिन्ताहेतुत्वात्कुलमपि पाशैव । एवं, शीलं=स्वभावः, सुशीलता दुःशीलतेत्यादौ तत्पदप्रयोगात्, स चापि कथञ्चित्सदुपदेशादिनाऽसतः कस्यचिद्ब्रह्मज्ञानाद्यर्थप्रवृत्तावपि ततः परावर्तकत्वात्पाशा । यद्वा, शीलं=सुस्वभावः, स चापि दानशीलादेरकिञ्चनस्य त्यक्तुमशक्यत्वेनान्ततो गृहस्थस्यात्त्यादिक्षयहेतुत्वात्पाशैव । वित्तमपि–एतावद्वित्तं कथं त्यजेयमिति चिन्तयतो धनिनः सन्मार्गगतिप्रतिबन्धकत्वात्पाशैवेति ध्येयम् ।

२०८ ज्ञाता–विषयचैतन्याभिव्यञ्जकान्तःकरणाज्ञानयोः परिणामात्मकवृत्त्युपहितं चैतन्यम् । ज्ञानम्–विषयचैतन्याभिव्यञ्जकान्तःकरणाज्ञानयोः परिणामविशेषः (=वृत्तिः) । ज्ञेयम्–घटाद्यवच्छिन्नं चैतन्यं घटादिर्वा । भोक्ता–सुखदुःखाकारवृत्त्युपहितं चैतन्यं । भोग्यम्–सुखदुःखान्यतरसाक्षात्कारिज्ञानविषयः (सुखादिः) । भोजनं (=भोगः) सुखदुःखान्यतरसाक्षात्कारः । कर्ता–क्रियायां स्वतन्त्रः (=कर्तुमकर्तुमन्यथा वा कर्तुं समर्थः) । कर्म–करणव्यापारविषयः, यथा वास्यादिकरणव्यापारस्योद्यमननिपातनादेर्विषयः काष्ठादिः । करणव्यापारनिष्पाद्या च क्रिया (=छेदनादिः) । संसारः–संसरति (जायते म्रियते च) यस्मिन्नहं ममाभिमानेन जीवः सः ।

२०९ तमः–चतुर्विधा प्रागुक्ता कार्य्याऽविद्या । अवस्थाः–जाग्रत्स्वप्नसुषुप्तिरूपास्तिस्रः । वियदादिकम्–पञ्च स्थूलभूतानि । कर्माणि–सञ्चितादीनि त्रीणि । देहः–स्थूलशरीरमित्यर्थः ।

प्राणाऽपानसमानादेर्नव वर्णाः प्रकीर्त्तिताः।
प्राणः स्यादिन्द्रनीलाभो हरितोऽपानसञ्ज्ञकः॥ २१०॥
उदानः स्यात्तडिद्वर्णो व्यानस्तु कपिलो मतः।
समानो नीलवर्णोऽथ पीतो नाग उदाहृतः॥ २११॥
श्वेतवर्णो भवेत्कूर्मः कृकलोऽञ्जनवर्णकः
इन्द्रनीलोपमश्चाथ भवेद्वायुर्धनञ्जयः॥ २१२॥
वायुः स्फटिकवर्णः स्याद्देवदत्ताह्वयस्तथा।
पश्यन्ति योगिनो वर्णान् नव वायोः प्रकीर्त्तितान्॥ २१३॥
पूर्वोक्तसप्तशीर्षण्यप्राणरन्ध्राणि सप्त वै।
शिश्नरन्ध्रं गुदारन्ध्रं रन्ध्राणि स्युः पुरे नव॥ २१४॥
केचित्त्वेष्वेव संयोज्य ब्रह्मरन्ध्रं तथा पुनः।
वदन्ति दशरन्ध्राणि नाभिनैकादशाऽपरे॥ २१५॥
(१०) इडा च पिङ्गला चैव सुषुम्णा च ततः परम्।
गान्धारी हस्तिजिह्वा च पूषा चैव पयस्विनी॥ २१६॥
लकुहा लम्बुषा चैव शङ्खिनी चेति भेदतः।
ततो दशविधा नाड्यः स्थूलदेहे समन्ततः॥ २१७॥

---

२१६ इडा=वामनासिकास्था नाडी (चन्द्रनाडी)। पिङ्गला=दक्षिणनासिकास्था (सूर्य्यनाडी)। सुषुम्णा=तदुभयमध्यस्था, गान्धारी=दक्षिणनेत्रस्था, हस्तिजिह्वा=वामनेत्रस्था, पूषा=दक्षिणकर्णस्था, पयस्विनी=वामकर्णस्था।

२१७ लकुहा=गुदप्रदेशस्था, लम्बुषा=मेढ्रनाडी, शङ्खिनी=नाभिनाडीति विवेकः।

इन्द्रो ब्रह्मा हरी रुद्र ईशश्च पद्मसम्भवः ।
भूस्सूर्य्यो वरुणश्चन्द्रो नाडीनां दश देवताः ॥ २१८ ॥

(१४) भूरादिसप्तकं चैव तथा पातालसप्तकम् ।
चतुर्दशविधं प्राज्ञैरेतद्भुवनमुच्यते ॥ २१९ ॥

(१५) दिग्वातार्कप्रचेतोऽश्विवन्हीन्द्रोपेन्द्रमृत्युकाः ।
तथा चन्द्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ ईश्वरः ॥ २२० ॥

इन्द्रियाणामधिष्ठातृदेवाः पञ्चदश स्मृताः ।
यानिन्द्रियाण्यधिष्ठाय भुञ्जते स्वस्वगोचरान् ॥ २२१ ॥

अस्थि चर्म कफः स्नायुः मज्जा मांसासृग्दूषिकाः ।
विण्मूत्रे वातपित्ते च शुक्रं श्लेष्मा च शोणितम् ॥ २२२ ॥

एवं पञ्चदशास्थ्यादि कीर्त्तितं वेदवित्तमैः ।
यैः सम्भूय देहोऽयं स्थूलो निर्मीयतेऽचिरात् ॥ २२३ ॥

---

२१८ इडादीनां निरुक्तनाडीनां दशदेवताश्च हरिर्ब्रह्मरुद्रेन्द्रवरुणेश-पद्मोद्भवपृथिवीसूर्य्यचन्द्रेत्येवंक्रमेण यथासङ्ख्यं बोध्याः । तत्र पद्मोद्भवः-चतुर्वक्त्रो ब्रह्मा, ब्रह्मा च हिरण्यगर्भः प्रजापतिरिति भेदः ।

२२० श्रोत्र-त्वग्-अक्षि-रसना-घ्राण-वाक्-पाणि-पाद-पायु-लिङ्ग-मनः-बुद्धि-चित्त-गर्व-तमसां पञ्चदशानां यथा क्रमेण दिग्वातार्कादयोऽधिष्ठातृदेवा ज्ञेयाः । प्रचेताः=वरुणः, मृत्युः=यमः, कः=प्रजापतिः । चतुर्वक्त्रः=ब्रह्मा ।

२२१ स्वस्वगोचरानिति, तमसः (=अज्ञानस्य) श्रोत्रादिवदसाधारण-विषयाभावेपि श्रोत्रादेर्विषयाः शब्दादय एव संहतास्तद्विषया अनुसन्धेयाः ।

२२२ स्नायुः=सिराबन्धनम् । दूषिका=नेत्रयोर्मलम् ।

(१६)रागद्वेषौ तथा कामक्रोधलोभमदा अपि।
मोहमात्सर्य्यभक्तीच्छाश्रद्धेर्ष्या गर्व एव च॥ २२४॥
दम्भो दर्पस्तथाऽसूया धर्मा एते तु षोडश।
बुद्धेरेवात्मनो नास्ति सम्बन्धस्तैः कथञ्चन॥ २२५॥
इन्द्रियाणि दश प्राणाः पञ्चान्तःकरणं तथा।
इति षोडशकं लिङ्गमाहुर्वेदान्तवेदिनः॥ २२६॥
पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्।
लिङ्गं सप्तदशात्मैतद्धाचार्य्याः केचिदूचिरे॥ २२७॥

---

२२४ रागः-स्त्र्यादिष्विष्टसाधनताबुद्ध्या स्नेहः, द्वेषः-लोकानामुद्वेगाचरणम्, कामः-स्त्र्यादिविषयकोऽभिलाषः, क्रोधः-कामप्रतिघातादुत्पद्यमानस्ताडनाऽऽक्रोशनादिहेतुः, लोभः-परद्रव्येच्छा, मोहः-अर्जितस्य द्रव्यस्य विनियोगाऽसामर्थ्यम्, मत्सरः-स्वसमानसंपत्तिदर्शनाऽसहनं, भक्तिः-आराध्यत्वेन ज्ञानम्, इच्छा-इष्टसाधनताज्ञानजन्योभिलाषः, श्रद्धा-गुरुवेदान्तवाक्यादौ विश्वासः, ईर्ष्या-पराश्रयामसहिष्णुत्वम्। गर्वः-अभिमानात्मिका चित्तवृत्तिः (मत्सदृशः को वेति)।

२२५ दम्भः=धर्मध्वजित्वम्। दर्पः=धनविद्यादिनिमित्तश्चित्तस्योत्सेकः। असूया-गुणेषु दोषाविष्कारः,-एते रागादयः षोडश बुद्धिधर्मास्तेषु भक्तिश्रद्धे मुक्तिहेतू, इच्छा तु मुक्तिहेतुर्बन्धहेतुश्च, अन्ये सर्वे बन्धहेतव इति विवेकः।

२२६ लिङ्गम्,-मायायां लयं गमनात् प्रत्यगात्मनो लिङ्गनात् (=ख्यापनात्) वा लिङ्गम्, समष्टिव्यष्टिभेदेन द्विधा यदस्य ग्रन्थस्यादौ प्रतिपादितं। तस्य घटकानवयवानाह-इन्द्रियाणीति। इदमेव लिङ्गशरीरं सूक्ष्मशरीरमित्यप्याख्यायते। अनेनैव सहितः कामकर्माविद्याभियुतो जीवात्मा लोकान्तरगमागमसमर्थो भवति।

(१९)केचिच्चतुर्विधं भेदं कृत्वान्तःकरणस्य हि ।
एकोनविंशकैस्तत्त्वैश्चितं लिङ्गं प्रचक्षिरे ॥ २२८ ॥

(२४)निरुक्तेष्वेव तत्त्वेषु सङ्कलय्याथ केचन ।
शब्दादीन्पञ्च चैवोचुश्चतुर्विंशतितत्त्वकम् ॥ २२९ ॥

(३६)पञ्चीकृतानि भूतानि पञ्चावस्थात्रयं तथा ।
शरीरत्रयमज्ञानमेष द्वादशको गणः ॥ २३० ॥

तत्त्वैः सम्भूय पूर्वोक्तैः षट्त्रिंशत्तत्त्वरूपकः ।
लिङ्गं सम्पादयेदेतत्प्राहुरन्ये विवेकिनः ॥ २३१ ॥

(९६)जगत्त्रयं च षड्भावविकाराश्च षडूर्मयः ।
गुणत्रयं तथा कर्मत्रयं षट् कोशिकास्तथा ॥ २३२ ॥

दिगाद्याश्चारिषड्वर्गयुता देवाश्चतुर्दश ।
मैत्र्यादिभावना चैव सङ्कल्पादिचतुष्टयम् ॥ २३३ ॥

व्यापाराः पञ्च वागादेः पूर्वोक्ततत्त्वसंयुताः ।
एतां षण्णवतिं चान्ये तत्त्वानां संबभाषिरे ॥ २३४ ॥

(७५)अस्थिमांसत्वचो नाडी रोम पञ्च क्षितेर्गुणाः ।
अपां श्लेष्मा तथा मूत्रं स्वेदः शुक्रं च शोणितम् ॥ २३५ ॥

क्षुत्तृण्णिद्रा तथालस्यं सङ्गोऽग्नेः पञ्च कीर्तिताः ।
धावनं चलनं चैव वियोगश्च प्रसारणम् ॥ २३६ ॥

आकुञ्चनं च पञ्चैते गुणा वायोरुदाहृताः ।
मत्सरो लोभमोहौ च कामक्रोधौ नभोगुणाः ॥ २३७ ॥

---

२३७ केचित्तु रागद्वेषभयलज्जामोहान्नभोगुणानाचक्षते ।

प्रातिस्विका गुणा एते पञ्च पञ्चोत्तरोत्तरम् ।
वर्द्धन्ते सङ्गताः पूर्वैर्गुणैः कारणसम्भवैः ॥ २३८ ॥
पञ्च खे दश वातेऽग्नौ गुणाः पञ्चदश स्मृताः ।
जले विंशतिसङ्ख्याकाः पञ्चविंशतिकाः क्षितौ ॥ २३९ ॥
एवमेते गुणाः सर्वे खादेस्सङ्कलिता बुधैः ।
पञ्चसप्ततिसङ्ख्याकाः प्रोच्यन्ते तत्त्वदर्शिभिः ॥ २४० ॥
कामः क्रोधश्च लोभश्च रागद्वेषमदास्तथा ।
मोहमात्सर्य्यगर्वेर्ष्या असूया दम्भदर्पकौ ॥ २४१ ॥
अनृतं पैशुनं मानो जुगुप्सा प्राणिपीडनम् ।
परिवादोऽतिवादश्च परितापोऽक्षमाऽधृतिः ॥ २४२ ॥

---

२३८ प्रातिस्विका इति, एते एवाकाशादीनां पञ्चविंशतिगुणाः पञ्चविंशतिप्रकृत्याख्यया वेदान्ते परिभाषिता इति ज्ञेयम् । एते गुणा आकाशादिषु कारणगुणप्रक्रमेणोत्पन्नैर्गुणैः सह सम्भूयोत्तरोत्तरं वर्द्धन्ते इत्यर्थः । तद्वृद्धिप्रकारमेवाह—पञ्चखे इति ।

२४१ इदानीमासुरसम्पद्गुणानाह—काम इति । कामाद्या दर्पान्ता गुणास्तु पूर्वं लक्षिता एव ।

२४२ अनृतम्=अयथार्थवचनम् । पैशुनम्=परोक्षे परदूषणवचनम् । मानः=सर्वत्राप्रणतिभावः । जुगुप्सा=परनिन्दा, गुणवतोपि दोषख्यापनमिति यावत् । प्राणिपीडनम्=स्वदेहपूरणाय प्राणिहिंसा । परिवादः=समक्षे परदूषणाभिधानम् । अतिवादः=निरर्थकोक्तिप्रलापः । परितापः=वृथा दुःखचिन्तनम् । अक्षमा=द्वन्द्वाऽसहिष्णुत्वम् । अधृतिः=इन्द्रियार्थेषु चापल्यम् ।

असिद्धिः पापकृत्यं च हिंसाऽज्ञानं ततः परम् ।
प्रातिकूल्यं विवित्सा च पारुष्यं स्तेयमेव च ॥ २४३ ॥
परिग्रहस्तथाऽशौचमित्येते सम्भवन्ति हि ।
गुणा जन्तोर्विजातस्य चितौ सम्पदमासुरीम् ॥ २४४ ॥
दानं दमश्च यज्ञश्च ज्ञानयोगव्यवस्थितिः ।
अभयं सत्त्वसंशुद्धिः स्वाध्यायस्तप आर्जवम् ॥ २४५ ॥
दया भूतेष्वलौलुप्यं त्यागः शान्तिरपैशुनम् ।
अहिंसा सत्यमक्रोधो मार्दवं ह्रीरचापलम् ॥ २४६ ॥
क्षमा तेजो धृतिः शौचमद्रोहो नातिमानिता ।
ध्यानं चोह्यं समाधानं वैराग्यं ब्रह्मचर्य्यकम् ॥ २४७ ॥
इत्यादयो गुणाः पूर्ववैपरीत्यात्समुद्भवाः ।
जायन्ते सम्पदं दैवीमभिजातस्य देहिनः ॥ २४८ ॥

---

२४३ असिद्धिः=धर्मज्ञानवैराग्यादेरलाभः । पापकृत्यम्=वेदप्रतिषिद्धाऽऽचरणम् । हिंसा=अविधिपूर्वकं प्राण्युपघातः । अज्ञानम्=तमः । प्रातिकूल्यम्=सर्वानिष्टाचरणम् । विवित्सा=विषयान्वेत्तुमिच्छा । पारुष्यम्=मनोवचोभ्यां नैष्ठुर्य्यम् । स्तेयम्=अविधिना परस्वापहारः ।

२४४ परिग्रहः=शरीरनिर्वाहाधिकार्थार्जनम् । अशौचम्=शरीरमनसोर्मालिन्यम् ।

२४५ दानम्=आर्तेभ्यः (पात्रेभ्यः) यथेष्टार्थवितरणम् । दमो=बाह्येन्द्रियनिग्रहः । यज्ञः=देवतोद्देशेन हविर्त्यागः ।

१४६ अलौलुप्यं-निरर्थमानसचेष्टाराहित्यम्, अचापलं-निरर्थबाह्यचेष्टाराहित्यमिति भेदः ।

१४७ चोह्यम्=कोऽहं कस्मात्कुत इत्यादिविचारः ।

वृत्तिरश्वत्थवृक्षस्य रूपकेणाथ वर्ण्यते ।
शाखादिस्थानिकास्तद्वत्तद्भेदाश्चाप्यनेकशः ॥ २४९ ॥

तज्ज्ञानायाथ तन्नाम पर्णे पर्णे समालिखम् ।
स्यात्तत्तु षष्टिसङ्ख्याकं सङ्ख्यातव्यं मुमुक्षुभिः ॥ २५० ॥

मेयचिद्व्यञ्जको योऽसावज्ञानमनसोर्द्वयोः ।
परिणामविशेषोऽसौ वृत्तिरित्युच्यते बुधैः ॥ २५१ ॥

सा च वृत्तिर्द्विधा प्रोक्ता प्रमैका चाऽप्रमाऽपरा ।
तच्च वृत्तीद्धबोधो वा बोधेद्धा सा प्रमा भवेत् ॥ २५२ ॥

---

१४९ यद्यपि पूर्वं प्रमाऽप्रमादयो वृत्तिभेदा अपि निरूपिता एव तथापि तेषां सङ्कीर्णत्वात्कियन्तः सर्वे वृत्तिभेदा इति जिज्ञासा नोपशाम्यति, अनुपशान्तजिज्ञासोश्च सर्ववृत्तिज्ञानाभावात्कीदृश्यो वृत्तयो निरोद्धव्याः कीदृश्यश्चोपासनीया इति विवेकाभावाच्च प्रयोजनं सिद्ध्येदित्यतोऽनायासेन वृत्तिभेदप्रभेदज्ञापनार्थमुक्तानामेव वृत्तीनां (कासाञ्चिदन्यासामपि) वृक्षरूपेण सङ्कलनं प्रतिजानीते–वृत्तिरिति ।

२५१ अज्ञानमनसोः=अज्ञानान्तःकरणयोः । व्यावहारिकघटपटाद्यर्थाकारवृत्तावन्तःकरणस्य परिणामात्मिका वृत्तिः प्रातिभासिकशुक्तिरजताद्यर्थाकारवृत्तौ त्वज्ञानस्य परिणामात्मिका वृत्तिरिति विभागः । अत्र लक्षणे क्रोधादिवृत्तावतिव्याप्तिवारणार्थं मेयचिद्व्यञ्जक इत्युक्तम् । चक्षुरादौ मेयचिद्व्यञ्जके चाऽतिव्याप्तिवारणार्थम् अज्ञानमनसोः परिणामविशेष इति ॥

२५२ वृत्तीद्धबोधः=वृत्तौ प्रतिबिम्बितं चैतन्यं, बोधेद्धा वृत्तिः=बोधेनेद्धा प्रकाशिता (प्रतिफलिता) वृत्तिरित्यर्थः । तत्राचेतनपदार्थानां घटपटादीनामुभयविधप्रमाविषयत्वं, चेतनस्य तु चेतनाऽविषयत्वेन नाद्यप्रमाविषयत्वमिति विभागः ।

सापि जीवाश्रया चैव तथा स्यादीश्वराश्रया ।
पृथक् पृथक्तयोस्तावल्लक्षणं सम्यगुच्यते ॥ २५३ ॥

स्वष्टव्यविषयाकारमायायां प्रतिविम्बितम् ।
चैतन्यं हि भवेदन्त्या प्रमा तच्चेश्वराश्रया ॥ २५४ ॥

द्वितीयाऽबाधिताज्ञातमेयाकारेण या भवेत् ।
अन्तःकरणवृत्तिस्तत्प्रतिरूपा चिदुच्यते ॥ २५५ ॥

सा पारमार्थिकी चैव तथा च व्यावहारिकी ।
अर्थभेदाद्द्विधा प्रोक्ता तल्लक्षणमथोच्यते ॥ २५६ ॥

तत्त्वमस्यादिवाक्योत्था प्रमा स्यात्पारमार्थिकी ।
जगत्प्रमाऽपरा तद्वत्साप्येवं षड्विधोच्यते ॥ २५७ ॥

प्रत्यक्षानुमितिश्चोपमितिः शाब्दी तथाविधा ।
अर्थापत्तिरभावाख्या चैवं सा षड्विधा भवेत् ॥ २५८ ॥

तच्च प्रमाणचैतन्यं मेयचिद्रूपतां गतम् ।
स्यात्प्रत्यक्षप्रमा सापि बाह्याचैवान्तरीति च ॥ २५९ ॥

आद्या रूपरसस्पर्शशब्दगन्धप्रभेदतः ।
पञ्चधा स्याद्द्वितीया तु द्विविधा परिकीर्तिता ॥ २६० ॥

---

२५५ बाधितशुक्तिरूप्याद्यर्थविषयकभ्रमज्ञानेऽतिप्रसङ्गवारणार्थमबाधितेत्यर्थविशेषणम्, अबाधितत्वं च संसारदशायां ग्राह्यं, तेन नाऽसम्भवः । अबाधितार्थविषयिण्यां स्मृतावतिव्याप्तिवारणार्थमज्ञातेति विशेषणम् । स्मृतेश्च नियतं संस्कारजन्यत्वेन ज्ञातविषयत्वान्नातिप्रसङ्गः ; निरुक्तस्मृतेरपि प्रमात्ववादिपक्षे तु न देयमेवाज्ञातेत्यर्थविशेषणं । तत्प्रतिरूपा=तत्प्रतिविम्बिता । शेषं स्पष्टार्थम् ।

तत्रात्मगोचरैका स्याद्द्वितीयाऽनात्मगोचरा ।
मयि दुःखं सुखं वेति स्यादन्त्याऽनात्मगोचरा ॥ २६१ ॥
प्रमात्मविषयाप्युक्ता द्विधैवाध्यात्मदर्शिभिः ।
विशिष्टात्मप्रमा चैव विशुद्धात्मप्रमापि च ॥ २६२ ॥
अहं जीवः सुखी दुःखी कर्ता भोक्तेति या प्रमा ।
सा विशिष्टप्रमा ख्याता द्वितीयाथ निरूप्यते ॥ २६३ ॥
शुद्धः प्रकाशरूपोऽहमिति शुद्धात्मगोचरा ।
सा ब्रह्मविषयापि स्यात्तथाऽतद्विषयापि च ॥ २६४ ॥
तत्राद्याऽवान्तरैर्वाक्यैरुत्पन्ना कथ्यते बुधैः ।
महावाक्येभ्य उत्पन्ना स्यात्प्रमा ब्रह्मगोचरा ॥ २६५ ॥
प्रत्यक्षायाः प्रमावृत्तेरयं भेदः प्रपञ्चितः ।
स्याल्लिङ्गज्ञानजं ज्ञानमनुमा सा भवेद्द्विधा ॥ २६६ ॥
स्वार्था चैव परार्था च लक्ष्यते सा पृथक् पृथक् ।
स्वार्था स्वानुमितेर्हेतुः परार्थान्यार्थमुच्यते ॥ २६७ ॥
सादृश्यज्ञानजं ज्ञानमुपमैवमुदीर्य्यते ।
शाब्दी प्रमा भवेद्या तु प्रमा स्याद्वाक्यकर्णिका ॥ २६८ ॥
लौकिकी वैदिकी चेति भेदात्सापि मता द्विधा ।
तत्राप्तवाक्यजन्याद्या वेदजन्या तु वैदिकी ॥ २६९ ॥
उपपाद्यप्रमाहेतुरुपपादककल्पनम् ।
अर्थापत्तिप्रमा सद्भिर्द्विधा सा चाप्युदीरिता ॥ २७० ॥

---

२७० उपपाद्येति, दिवाऽभुञ्जानस्य देवदत्तस्य पीनत्वं दृष्ट्वा यत्र रात्रिभोजनं तदुपपादकं कल्प्यते तत्रोपपाद्यं पीनत्वज्ञानं करणम् (=अर्था-

दृष्टा चैव श्रुता चैव तत्रान्त्यापि द्विधा पुनः ।
नाम्नाऽभिधानाभिहिताऽनुपपत्ती तु ते मते ॥ २७१ ॥

वाक्यार्थैकदेशस्यानुपपत्तौ यथादिमा ।
पिधेहीत्यन्तरा द्वारमिति स्यान्नोपपत्तिमत् ॥ २७२ ॥

यत्र सर्वोऽपि वाक्यार्थो न विनाऽन्यार्थकल्पनम् ।
उपपन्नो भवेत्तत्र स्यादन्त्याऽभिहिताभिधा ॥ २७३ ॥

स्वर्गकामो यजेतात्र यथाऽपूर्वार्थकल्पनम् ।
विनाऽयुक्ते समस्तेऽपि वाक्यार्थे सा प्रकीर्त्यते ॥ २७४ ॥

एवं तावत्प्रमावृत्तेः प्रपञ्चोऽयं निरूपितः ।
अप्रमायास्तथेदानीं प्रपञ्चोऽत्र निरूप्यते ॥ २७५ ॥

प्रमाभिन्नं भवेज्ज्ञानमप्रमा सा भवेद्द्विधा ।
स्मृतिश्चैवानुभूतिश्च द्विधा लक्षणयोगतः ॥ २७६ ॥

संस्कारमात्रजं ज्ञानं स्मृतिरित्युच्यते बुधैः ।
स्मृतिभिन्नं भवेज्ज्ञानमनुभूतिः सतां मता ॥ २७७ ॥

तत्रोच्येते स्मृतेरादौ भेदतल्लक्षणे पृथक् ।
अनुभूतेस्त्वितोऽग्रे ते सम्यक् स्पष्टीभविष्यतः ॥ २७८ ॥

पत्तिप्रमाणम्) रात्रिभोजनकल्पनं च फलम् (=अर्थापत्तिप्रमा), इयमेव दृष्टार्थापत्तिरित्युच्यते ।

२७७ 'ज्ञानं स्मृति'रित्युक्तेऽनुभवेतिप्रसङ्ग इति संस्कारमात्रजमित्युक्तम्; संस्कारेन्द्रियसम्प्रयोगोभयजन्ये सोयं देवदत्त इत्यादिप्रत्यभिज्ञात्मके ज्ञानेतिप्रसङ्गवारणार्थं मात्रपदमुपात्तम् । संस्कारमात्रजन्ये संस्कारध्वंसेऽतिव्याप्तिवारणार्थं ज्ञानमिति विशेष्यदलम् ।

आत्मस्मृतिरथानात्मस्मृतिभेदात्स्मृतिर्द्विधा ।
द्विविधापि पुनः सोक्ता द्विविधैव महर्षिभिः ॥ २७९ ॥
यथार्था चाऽयथार्था च तत्राद्यादाविहोच्यते ।
समासतस्त्वितोऽन्यच्च द्रष्टव्या तत्प्रविस्तृतिः ॥ २८० ॥
तत्सद्ब्रह्माहमस्मीति महावाक्यार्थचिन्तनम् ।
यथार्थात्मस्मृतिः ख्याता महामोहान्ध्यनाशिका ॥ २८१ ॥
यद्दृश्यत्वादिभिर्लिङ्गैर्जगन्मिथ्यात्वभावनम् ।
स्मृतिः सा स्याद्यथाभूतसमस्ताऽनात्मगोचरा ॥ २८२ ॥
एवमेवायथार्थे द्वे स्मृती स्यातामितोऽन्यथा ।
पूर्वोक्तवैपरीत्येन विपर्यस्तार्थगोचरे ॥ २८३ ॥
सदात्मत्वानुसन्धानमसद्देहेन्द्रियादिषु ।
यद्वा स्वात्मन्यसत्त्वादेरयथार्थात्मनः स्मृतिः ॥ २८४ ॥
मिथ्याभूतप्रपञ्चस्य यत्सत्यत्वेन चिन्तनम्
साऽयथार्था स्मृतिः प्रोक्ता प्रतीपाऽनात्मगोचरा ॥ २८५ ॥
एवं षड्विधभेदैस्तु भिन्ना स्मृतिरुदाहृता ।
विंशत्या च तथा भेदैरनुभूतिरथोच्यते ॥ २८६ ॥
स्मृतिभिन्नस्य भानस्याऽनुभूतित्वं पुरेरितम् ।
यथार्थत्वायथार्थत्वभेदात्सापि भवेद्द्विधा ॥ २८७ ॥
स्याद्यथार्थानुभूतिर्हि प्रमा सा तु निरूपिता ।
संशयो निश्चयश्चेति भेदादन्या द्विधा भवेत् ॥ २८८ ॥
भासमानं विरुद्धं यज्ज्ञानं नानात्वकोटिकम् ।
एकस्मिन्नाश्रये तत्स्यात्संशयः सोपि च द्विधा ॥ २८९ ॥

प्रमाणसंशयश्चैव प्रमेयस्याथ संशयः।
प्रमेयसंशयोपि स्याद्द्विधात्मानात्मगोचरः॥ २९०॥
स्थाणुर्वा पुरुषो वेति संशयोऽनात्मगोचरः।
जीवब्रह्मेशभेदात्तु त्रिधा स्यादात्मसंशयः॥ २९१॥
जीवो देहादिसङ्घातादतिरिक्तो न वाथवा।
अतिरिक्तोप्यकर्ता वा कर्ता वा स उदाहृतः॥ २९२॥
अकर्तृत्वेपि चिद्रूपो वा न वेत्यादिसंशयः।
स्याज्जीवविषयो ब्रह्मविषयः कथ्यतेऽधुना॥ २९३॥
ब्रह्माद्वयं भवेत्किं वा सद्वयं ब्रह्म तद्भवेत्।
आद्येप्यानन्दरूपं वा यद्वाऽऽनन्दगुणं मतम्॥ २९४॥
इत्यादिसंशयस्तत्र भवेद्ब्रह्मात्मगोचरः।
ईशगः स तथेदानीं संशयः कथ्यतेपि च॥ २९५॥
विस्पष्टं भासमानस्य जगतो मूलकारणम्।
भवेदीशो नवेत्यादिः स्यादीशगतसंशयः॥ २९६॥
संशयाद्विपरीतः स्याद्बोधो निश्चयनामकः।
तर्को विपर्ययश्चेति भेदात्सोथ द्विधोच्यते॥ २९७॥
तर्कस्तु व्याप्यमारोप्य व्यापकापादनं स्मृतम्।
तथोक्तोऽध्यात्मतत्त्वज्ञैर्मिथ्याज्ञानं विपर्ययः॥ २९८॥

---

२९८ व्याप्यारोपेण व्यापकारोपस्तर्कः, यथा—यदि पर्वते वन्हिर्न स्यात्तर्हि धूमोपि न स्यादिति। अत्र वन्ह्यभावो व्याप्यः, धूमाभावश्च व्यापकः, "व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम्"—इतिवचनात्। शेषमतिरोहितम्।

सोऽपि सोपाधिकश्चेति तथा स्यान्निरुपाधिकः ।
द्विविधोऽपि पुनर्द्वेधा स्याद्वाह्यान्तरभेदतः ॥ २९९ ॥
लोहितस्फटिकादेस्तु बाह्यः सोपाधिको भ्रमः ।
कर्तृत्वादिभ्रमः सद्भिरुक्तश्चाभ्यन्तरस्तथा ॥ ३०० ॥
रज्जुसर्पग्रहो बाह्यः स्याद्भ्रमो निरुपाधिकः ।
अहमज्ञो न जानामि ब्रह्मेत्यादिः स आन्तरः ॥ ३०१ ॥
एवं तावदियं वृत्तिर्वृत्तत्वेनोपवर्णिता ।
शाखादिस्थानिकास्तद्वत्तद्भेदाश्च यथायथम् ॥ ३०२ ॥
सामान्येनाथ तद्भेदलक्षणे च निरूपिते ।
जिज्ञासूनां सुबोधार्थं वेदान्तमतरीतितः ॥ ३०३ ॥
विहाय निखिला वृत्तीर्यावत्योऽनात्मगोचराः ।
सदाऽद्वितीयचिद्रूपं ब्रह्माहमिति चिन्तयेत् ॥ ३०४ ॥
तया वृत्त्याऽखिलानर्थबीजाज्ञाने हि बाधिते ।
सदा स्वानन्दरूपेण स्यात्स्थितिः प्रत्यगात्मनः ॥ ३०५ ॥

॥ अथावशिष्टाः सञ्ज्ञाः ॥

दृष्टिरेव भवेत्सृष्टिर्दृष्टिसृष्टिर्मते, तथा ।
दृष्टिकालीनसृष्टिस्तु दृष्टिसृष्टिर्मतान्तरे ॥ १ ॥

---

३०४ यत्प्रयोजनार्थमियं वृत्तिरुपवर्णिता तत्प्रयोजनमिदानीं स्फुटयति—विहायेति ।

---

१ मते=सिद्धान्तमुक्तावलीकारमते, दृश्यस्य दृष्टिभेदे प्रमाणाभावाद्दृष्टेश्च स्वयंप्रकाशज्ञानस्वरूपत्वाज्ज्ञानस्वरूपमेव (=प्रातीतिकमेव) जगदित्यर्थः, तथाऽन्यदृष्टिसृष्टिवादिमते चिदचितोरभेदाऽसम्भवात्साक्षिरूपदृष्टिभिन्नमपि जगद्दृष्टेः प्रागसत्त्वाद्दृष्टिसमकालीनमेवेत्यर्थः ।

सृष्ट्यूर्द्ध्वभाविनी दृष्टिः सृष्टिदृष्टिरितीर्य्यते ।
व्यावृत्तिर्व्यतिरेकः स्यादन्वयोऽनुगमस्तथा ॥ २ ॥
बहिरन्तर्विभेदेन चेन्द्रियं द्विविधं मतम् ।
मनोऽन्तरिन्द्रियं प्रोक्तं ज्ञानकर्मेन्द्रियाणि तु ॥ ३ ॥
दश बाह्येन्द्रियाणि स्युरुक्तान्यध्यात्मदर्शने ।
एतान्येव तु संयोज्य प्रोक्तान्येकादशापि च ॥ ४ ॥
बहिरङ्गाऽन्तरङ्गे द्वे ज्ञानाङ्गे समुदीरिते ।
बहिरङ्गं तु यागादि तथाऽन्तः श्रवणादिकम् ॥ ५ ॥

---

२ सृष्टिदृष्टिवादिमते परमेश्वर एव प्रपञ्चकल्पकः "आत्मन आकाशः सम्भूतः"-इत्यादिश्रुते, स्तस्य च प्रपञ्चस्य दृष्टेः प्रागूर्द्ध्वं चापि सत्त्वादज्ञातसत्त्वैव, नतु शुक्तिरजतस्वप्नप्रपञ्चादिवज्ज्ञातसत्तेति तत्तदर्थविषयकप्रमाणावतरणे तस्य दृष्टिसिद्धिरिति । इदानीं नैयायिकाद्यभिमतान्वयव्यतिरेकविलक्षणौ पञ्चदश्या† दिग्रन्थोक्तावन्वयव्यतिरेकावाह-व्यावृत्तिरिति । स्वप्नावस्थायां स्थूलप्रपञ्चस्य व्यावृत्तावात्मनो योऽनुगमः स आत्मनोऽन्वयः, आत्मनोऽन्वये च या तत्रैव स्थूलप्रपञ्चस्य व्यावृत्तिः सा तस्य व्यतिरेकः, एवं सुषुप्त्यादावप्यूह्यम् ।

३ मनोऽन्तरिन्द्रियं वाचस्पतिमिश्रमते । आचार्य्यास्तु "इन्द्रियेभ्यः परं मनः"-इति वाक्यान्मनो नेन्द्रियं, वृत्तिं प्रत्युपादानत्वाच्च न करणमित्याहुः ।

५ बहिरङ्गान्तरङ्गे-ब्रह्मज्ञानं प्रति बहिरङ्गान्तरङ्गे इत्यर्थः । यागादिकमन्तःकरणशुद्धिद्वारा ब्रह्मविविदिषोत्पादकत्वेन परम्परया ब्रह्मज्ञानसम्पादकत्वेन तत् प्रति बहिरङ्गं, श्रवणमननादिकं तु साक्षाज्ज्ञानसाधनत्वात्तत्प्रत्यन्तरङ्गमित्यर्थः ।

---

† यद्यपि पञ्चदशीतिशब्दो दुःशक्यसाधनस्तथाप्यतिप्रचलितत्वात्तथैवोपन्यस्तः ।

यौगपद्यक्रमाभ्यां च व्याप्ता सृष्टिर्द्विधेष्यते ।
शास्त्रीयं चाप्यशास्त्रीयं द्वैतं तद्वद्द्विधा मतम् ॥ ६ ॥
जन्यं सुखं तथाऽजन्यं सुखमेवं द्विधा भवेत् ।
जन्यं वृत्तिसुखं ब्रह्मसुखं चाऽजन्यमीर्य्यते ॥ ७ ॥
सामानाधिकरण्यं च द्विधाऽऽख्यातं मनीषिभिः ।
बाधमुख्यविभेदेन, भावस्तद्वद्द्विधा मतः ॥ ८ ॥

---

६ युगपत्सृष्टिः—दृष्टिसृष्टिवादिमते । एतन्मते यथा स्वप्नावस्थायां किञ्चिन्मात्रादिकं पूर्वसिद्धत्वेन किञ्चिच्च पुत्रादिकं पश्चात्सिद्धत्वेन प्रतीतमपि वस्तुतः प्रसुप्तनिद्रादोषात्तत्सर्वं युगपदेवोत्पन्नं, तथा जागरेऽपि "आत्मन आकाशः सम्भूत आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी"—इति पूर्वाऽपरीभावेन श्रूयमाणमाकाशादिकं मातृपुत्रादिकं वाऽविद्यादोषाद्युगपदेवोत्पन्नमिति । क्रमसृष्टिः—सृष्टिदृष्टिवादिमते । एतन्मते आकाशादिकं मातृपुत्रादिकं वा यथायथं क्रमेण स्वस्वकारणकलापादेवोत्पन्नमिति विवेकः । शास्त्रीयं द्वैतं—गुरुशास्त्रादिकं, तच्च ज्ञानस्य साधकं न तु विघातकम्, अशास्त्रीयं द्वैतं (—कामक्रोधादिकं) तु विघातकमित्यनुसन्धेयम् ।

८ बाधमुख्यविभेदेन=बाधसामानाधिकरण्यं मुख्यसामानाधिकरण्यं चेति सामानाधिकरण्यं द्विविधमित्यर्थः । तत्रान्यतरस्य बाधेन सामानाधिकरण्यं बाधसामानाधिकरण्यं, यथाऽऽभासवादिविद्यारण्यस्वामिमतेऽन्तःकरणप्रतिबिम्बस्य जीवस्य बाधेन ब्रह्मणा सामानाधिकरण्यम् (अभेदः,) यथा वा जगतो बाधेन "सर्वं खल्विदं ब्रह्मे"त्यादिश्रुत्युक्तं जगतो ब्रह्मणा सामानाधिकरण्यम् । मुख्यसामानाधिकरण्यं यथा सिद्धान्तमुक्तावलीकारादिमतेऽज्ञानोपहितस्य जीवस्याऽबाधेन ब्रह्मणा सामानाधिकरण्यम् । अद्वैतसिद्धौ तु बाधसामानाधिकरण्यं विशेषणविशेष्यभावसामानाधिकरण्यम् अभेदसामानाधिकरण्यमध्याससामानाधिकरण्यं चेति

सद्रूपोऽसद्विधर्मा च सद्रूपो ब्रह्मचिद्भवेत् ।
तथाऽज्ञानादिविश्वाख्यो भावश्चाऽसद्विलक्षणः ॥ ९ ॥
वृत्तिव्याप्तिः फलव्याप्तिर्व्याप्तिरेवं द्विधा भवेत् ।
वाक्यं चाऽवान्तरं तद्वन्महावाक्यमिति द्विधा ॥ १० ॥
महावाक्यं तु यज्जीवब्रह्मणोरैक्यबोधकम् ।
तदन्यन्निखिलं वेदवाक्यं चावान्तरं भवेत् ॥ ११ ॥
साक्षाद्विधिमुखेनाऽथाऽतन्निषेधमुखेन च ।
ब्रह्मण्येवं द्विधाऽऽख्यातं वेदान्तानां प्रवर्त्तनम् ॥ १२ ॥
वक्तृतात्पर्य्यमेवाथ शब्दतात्पर्य्यमेव च ।
तात्पर्य्यं तद्द्विधा प्रोक्तमेवं वेदान्तवेदिभिः ॥ १३ ॥

चातुर्विध्यमुक्तम् । तत्राद्यं स्थाणुः पुरुष इत्यत्र, द्वितीयं नीलमुत्पलमित्यत्र, तृतीयं तत्त्वमसीत्यादौ, चतुर्थं तु इदं रजतमित्यादिस्थले इति । तत्राऽऽद्याऽन्त्ययोर्बाधसामानाधिकरण्यऽन्तर्गत्वादितरयोश्च मुख्यसामानाधिकरण्ये न द्वैविध्यहानिरिति ध्येयम् ।

१० घटपटादीनामनात्मनां वृत्तिफलचैतन्योभयभास्यत्वेनोभयव्याप्यत्वं, चेतनस्य तु चेतनाऽविषयत्वेन न फलव्याप्यत्वं किन्तु केवलं वृत्तिव्याप्तिरेव तत्रेष्यते ।

१२ "सर्वं खल्विदं ब्रह्म"—इत्यादिवेदवाक्यानां विधिमुखप्रवृत्तिः, "अथात आदेशो नेति नेति"—इत्यादीनां तु निषेधमुखप्रवृत्तिः ।

१३ वक्तृतात्पर्य्यम्—पुरुषाभिप्रायः ॥ तज्ज्ञानं वाक्यार्थज्ञाने न कारणं, तदभावेऽप्यव्युत्पन्नवाक्याद्वाक्यार्थज्ञानदर्शनात् । तदितरत्प्रतीतिमात्रेच्छयाऽनुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं—शब्दतात्पर्य्यं, यथा भोजनप्रकरणे 'सैन्धवमानये'तिवाक्यस्थं सैन्धवपदं लवणेतराश्वादिप्रत्यायनेच्छयाऽनुच्चरितत्वे सति लवणरूपार्थविषयकप्रतीतिजननयोग्यमिति । अस्यैव तात्पर्य्यस्य निर्णायकान्युपक्रमादीनि षड्विधलिङ्गान्युक्तानि ।

अपवादस्त्रिधा प्रोक्तः शास्त्रीयो यौक्तिकस्तथा ।
प्रत्यक्षश्चेति भेदेन मिथ्याभूतस्य वस्तुनः ॥ १४ ॥
विधिस्त्रेधा समाख्यातोऽपूर्वोऽप्राप्ते निगद्यते ।
नियमः पाक्षिके तद्वत्परिसङ्ख्याऽन्यवारकः ॥ १५ ॥
पारमार्थिकजीवोऽथ जीवश्च व्यावहारिकः ।
प्रातिभासिकजीवश्च जीवा एते त्रयो मताः ॥ १६ ॥

---

१४ अपवादो नाम—अधिष्ठाने भ्रान्त्या प्रतीतस्याधिष्ठानव्यतिरेकेणाभावनिश्चयः, यथा शुक्त्यादौ भ्रान्त्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किन्तु शुक्तिरित्यभावनिश्चयः । स च बाधस्त्रिविधः । शास्त्रीयो यौक्तिकः प्रत्यक्षश्चेति । तत्र "ऽथात आदेशो नेति नेती"त्यादिश्रुत्या ब्रह्मव्यतिरेकेण प्रपञ्चाभावनिश्चयः शास्त्रीयो बाधः । मृद्व्यतिरेकेण घटाभावनिश्चयवन्निखिलकारणीभूतब्रह्मव्यतिरेकेण प्रपञ्चाभावनिश्चयो यौक्तिको बाधः । तत्त्वमस्यादिवाक्योत्थात्मसाक्षात्कारेणाऽज्ञानतत्कार्य्यनिवृत्तिः प्रत्यक्षो बाध इति ।

१५ अत्यन्ताऽप्राप्तार्थविधायको हि—अपूर्वविधिः ; यथा "व्रीहीन् प्रोक्षती" ति व्रीहिप्रोक्षणविधिः । पक्षे प्राप्तस्याऽप्राप्तांशपूरको विधिः—नियमविधिः ; यथा यागाङ्गत्वेन प्राप्तानां व्रीहीणां नखविदलनमुषलावहननयोर्द्वयोः पक्षयोः कदाचिन्नखविदलनस्य प्राप्तौ सत्यां मुषलावहननमप्राप्तं स्यात्तस्य पूरको "व्रीहीनवहन्यादि" त्यवघातविधिः । उभयप्राप्तावितरव्यावृत्तिबोधको विधिः—परिसङ्ख्याविधिः ; यथा यागाङ्गत्वेन पशुरशनाग्रहणे कर्तव्ये यागाङ्गत्वाऽविशेषादश्वगर्द्दभयोर्द्वयोरशनाग्रहणशङ्कायाम—"अश्वाभिधानीमादत्ते"—इति गर्द्दभरशनाग्रहणव्यावृत्तिविधिः । नियमविधावितरव्यावृत्तिरार्थिकी परिसङ्ख्याविधौ तु विधेया—इति नियमविधिपरिसङ्ख्याविध्योर्भेदः । एवमा"त्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"—इत्यात्मविषयकश्रवणमननादिष्वपि मतभेदेन तत्तद्वैदान्तिकोक्ता अपूर्वादयो विधयः सिद्धान्तलेशादौ द्रष्टव्याः, इह तु सञ्ज्ञामात्रं परिचायितम् ।

कूटस्थस्तच चाद्यः स्यात् परोऽन्तःकरणान्वितः ।
प्रातिभासिकजीवस्तु क्लृप्तः स्याद्व्यावहारिके ॥ १७ ॥
गौणात्मा चाथ मिथ्यात्मा मुख्यात्मा च तथाविधः ।
आत्मा क्रमात्त्रिधा पुत्रदेहकूटस्थसञ्ज्ञकः ॥ १८ ॥
तन्त्रत्वं त्रिविधं पुत्रप्रजाभास्यार्थगोचरम् ।
जन्यत्वेनाश्रयत्वेन भास्यत्वेन तथैव च ॥ १९ ॥
व्यावर्त्तकानि त्रीणि स्युरुपाधिश्चोपलक्षणम् ।
तथा विशेषणं चैव वस्तूनां यत्नतत्र हि ॥ २० ॥
आकाङ्क्षा योग्यताऽऽसत्तिस्तात्पर्य्यज्ञानमेव च ।
चत्वार्य्येतानि वाक्यार्थज्ञान उक्तानि हेतवः ॥ २१ ॥

---

१८ पुत्रादिपदमुपलक्षणं, पौत्रप्रपौत्रस्नुषादेरपि, तथा च पुत्रादिकं गौणात्मा, देहादिकं मिथ्यात्मा, कूटस्थश्च मुख्यात्मा—इति विवेकः । अत एव पुत्रादौ पुष्टे नष्टेऽहमेव पुष्टो नष्ट इति व्यवहारः ।

१९ जन्यत्वेन पुत्रादेः पित्रादितन्त्रत्वम् (= अधीनत्वम्), आश्रयत्वेन प्रजाया राजतन्त्रत्वम्, भास्यत्वेन च भास्यार्थानां घटपटादीनां ज्ञानादितन्त्रत्वमित्यर्थः ।

२० कार्य्यान्वयित्वे सति वर्तमानत्वे च सति व्यावर्त्तकं-विशेषणं; यथा नीलरूपादिकं घटस्य । कार्य्याऽनन्वयी वर्तमानो व्यावर्तक-उपाधिः; यथा जवाकुसुमादिकं स्फटिके लौहित्योपाधिः । कादाचित्कत्वे सति व्यावर्तकमुपलक्षणं; यथा काकादिकं देवदत्तगृहादेः । एवं कार्य्यान्वयित्व-वर्तमानत्व-व्यावर्त्तकत्वेष्वेकैकविशेषणह्रासकृतो विशेषणादेर्भेद ऊहनीयः ।

२१ आकाङ्क्षा—येन पदेन विना यस्य पदस्याऽन्वयबोधाऽजनकत्वं तेन तस्य समभिव्याहारः, यथा 'द्वारमि'त्यनेन 'पिधेही'त्यादेः । योग्यता—बा-

जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा ।
अविद्यातच्चितोर्योगो वेदा ते षडनादयः ॥ २२ ॥
ऋगादयश्च वेदाः स्युश्चत्वारोऽङ्गानि षट् तथा ।
तथोपाङ्गानि चत्वारि विद्या एताश्चतुर्द्दश ॥ २३ ॥
पुराणानि तथा न्यायो मीमांसाशास्त्रमेव च ।
धर्मशास्त्रं तथैतानि चोपाङ्गानि विदुर्बुधाः ॥ २४ ॥
कार्य्यकारणभावश्चैवाधाराऽऽधेयता तथा ।
विषयविषयित्वं च संयोगश्च तथाविधः ॥ २५ ॥
आध्यासिकं च तादात्म्यं मुख्यं तादात्म्यमेव च ।
एवमेवंविधा भेदाः सम्बन्धानामुदीरिताः ॥ २६ ॥

क्यार्थोऽबाधः । शक्ति†लक्षणाऽन्यतरसम्बन्धेन पदजन्यपदार्थोपस्थितिः—आसत्तिः । तात्पर्य्यन्तु द्विविधमुदीरितमेव प्राक् ।

२२ जीवेशतद्भेदानामनादित्वकीर्त्तनं पञ्चदश्यादिग्रन्थानुसारेण, सङ्क्षेपशारीरककृत्सर्वज्ञमुनिमते तु तेषामज्ञानोत्तरभावित्वाच्चाऽनादित्वं । तदुक्तम्—"पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः"—इति ।

२५ कार्य्यकारणभावः सम्बन्धो यथा मृद्घटयोः, आधाराधेयभावो यथा भूतलघटयोः, विषयविषयिभावो ज्ञानज्ञेययोः, संयोगो यथा कुण्डबदरयोः ।

२६ आध्यासिकं तादात्म्यं (=कल्पिततादात्म्यं) यथा देहात्मनोः शुक्तिरजतयोर्वा । मुख्यं तादात्म्यम् (=अभेदः) यथा जीवब्रह्मणोर्नीलघटयोर्वा । एवं भावाभावादेः प्रतियोग्यनुयोग्यादिभावोऽपि सम्बन्धो बोध्यः ।

---

† शक्तिर्नाम मुख्या वृत्तिः पदपदार्थयोर्वाच्यवाचकभावः सम्बन्ध इति यावत् । सा च द्विविधा,-योगो रूढिश्च । तत्राऽवयवशक्तिर्योगो यथा पाचकादिपदानाम् समुदायशक्ता रूढिर्यथा घटादिपदानामिति ।

आरम्भिपरिणाम्याख्ये विवर्त्तं चेति भेदतः ।
कारणं त्रिविधं प्रोक्तं जन्यस्याऽनात्मवस्तुनः ॥ २७ ॥
द्विधाऽभावः समाख्यातो ह्यत्यन्तोऽन्योन्य एव च ।
प्रागभावाद्यभावानां सदद्वैते परासनात् ॥ २८ ॥
अध्यात्मं चाधिभूतं च तथा चैवाधिदैवतम् ।
अध्यात्मादित्रिकं चैतत्कीर्त्तितं बोधसाधकम् ॥ २९ ॥

इति श्रीवेदान्तादर्शे मोहनलालवेदान्ताचार्य्यप्रणीते सञ्ज्ञादर्शो नाम प्रथम आदर्शः ॥ १ ॥

---

२७ आरम्भकारणवादो नैयायिकवैशेषिकयोर्बोध्यः । तत्प्रकारस्त्वीदृशः,—पूर्वमीश्वरेच्छावशात्पार्थिवादिपरमाणुषु क्रियाद्युत्पत्त्यनन्तरं द्व्यणुकमुत्पद्यते, ततस्त्र्यणुकचतुरणुकादिक्रमेण भूतभौतिकानि द्रव्याणीति । परिणामकारणवादश्च साङ्ख्यानां ज्ञेयः । परिणामो नाम—उपादानसमसत्ताकत्वे सत्यन्यथाभावो, यद्वा उपादानसलक्षणत्वे सत्यन्यथाभावः । एतन्मते सत्त्वरजस्तमोगुणसाम्यावस्थायाः प्रकृतेरेव परिणामो जगदिति । विवर्त्तकारणवादो वैदान्तिकानाम् । विवर्त्तो नाम—उपादानविषमसत्ताकत्वे सत्यन्यथाभावः । एतन्मते ब्रह्मणो विवर्त्तमखिलं जगत् । इत्युपादानकारणत्रितयवादः ।

२८ अभावः—नञ्शब्दोल्लेखिप्रतीतिविषयः । सचाऽभावो द्विविधोऽत्यन्ताभावोऽन्योन्याभावश्च । "सदेव सोम्येदमग्र आसीत्"—इत्यादिश्रुतौ प्रागुत्पत्तेः कार्य्यस्य कारणात्मना सत्त्वप्रतिपादनेन न प्रागभावः, ज्ञानं विना चोत्पन्नस्य घटादेर्निरन्वयनाशानङ्गीकारेण नापि ध्वंसः ।

२९ मनोऽध्यात्मं, मन्तव्यमधिभूतं, चन्द्रस्तत्राधिदैवतम् । बुद्धिरध्यात्मं, बोद्धव्यमधिभूतं, बृहस्पतिः‡ स्तत्राधिदैवतम् । अहङ्कारोऽध्यात्ममहङ्कर्त्तव्यम-

‡ केचित्तु बृहस्पतिस्थाने चतुर्वक्त्रमधिदैवतं पठन्ति ।

॥ अथोत्पत्तिप्रलयादर्शः ॥

चराचरस्य विश्वस्य यथा यस्मात्समुद्भवः ।

आदर्शेऽस्मिन्क्रमात्सर्वं तत्तथाऽथ निरूप्यते ॥ १ ॥

ईश्वरेच्छावशादादौ मायाऽऽकाशं ससर्ज ह ।

आकाशाज्जायते वायुर्वायोरग्निस्तथैव च ॥ २ ॥

धिभूतं, रुद्रस्तत्राधिदैवतम् । चित्तमध्यात्मं, चेतयितव्यमधिभूतं, क्षेत्रज्ञस्तत्राधिदैवतम् । श्रोत्रमध्यात्मं, श्रोतव्यमधिभूतं, दिशस्तत्राधिदैवतम् । त्वगध्यात्मं, स्पर्शयितव्यमधिभूतं, वायुस्तत्राधिदैवतम् । चक्षुरध्यात्मं, द्रष्टव्यमधिभूतं, सूर्य्यस्तत्राधिदैवतम् । जिह्वाऽध्यात्मं, रसयितव्यमधिभूतं, वरुणस्तत्राधिदैवतम् । नासिकाऽध्यात्मं, घ्रातव्यमधिभूत,मश्विनौ तत्राधिदैवतम् । वागध्यात्मं, वक्तव्यमधिभूत,मग्निस्तत्राधिदैवतम् । पाणी अध्यात्म,मादातव्यमधिभूत,मिन्द्रस्तत्राधिदैवतम् । पादावध्यात्मं, गन्तव्यमधिभूतं, विष्णुः (उपेन्द्रः)तत्राधिदैवतम् । पायुरध्यात्मं, विसृज्यमधिभूतं, मित्रोमृत्युर्वा तत्राधिदैवतम् । उपस्थोऽध्यात्मं, स्याद्यानन्दोऽधिभूतं, प्रजापतिस्तत्राधिदैवतमिति ।

इति श्रीमदुदासीनवरश्रीमन्मुकुन्ददासशिष्येण मोहनलालवेदान्ताचार्य्येण प्रणीते आदर्शालोके सज्ज्ञाऽऽलोकः ।

---

२ इदानीं प्रपञ्चस्योत्पत्तिक्रमं निरूपयति–ईश्वरेच्छेति । अत्राकाशवाय्वादीनि पञ्चभूतान्यपञ्चीकृतानि शब्दस्पर्शरूपरसगन्धतन्मात्रारूपाणि ग्राह्याणि । अयमाशयः–यथा मन्दालोके प्रभाते प्रथमतः सामान्येन पदार्था अवभासन्ते ततश्चोदिते सवितर्ययं घटोऽयं पट इति विशेषाकारेण, यथा वा मस्याकारैर्लाञ्छिते पटे चित्राणि प्रथमतः सामान्याकारेण, वर्णपूरिते (=रञ्जिते) तु विशेषाकारेणावभासन्ते तथैवाकाशादिक्रमपि

अग्नेराप: समुत्पन्नास्तथाऽद्भ्यो भूरजायत ।
मायायास्त्रिगुणात्मत्वात्त्रिगुणं भूतपञ्चकम् ॥ ३ ॥
सात्त्विकांशेभ्य एतेषां व्यस्तेभ्य: समजायत ।
यथाक्रमेण कर्णादि धीन्द्रियं धीप्रयोजकम् ॥ ४ ॥
तत्राकाशस्य सत्त्वांशाज्जायते श्रोत्रमिन्द्रियम् ।
वायोस्त्वगिन्द्रियं सत्त्वात्तेजसश्चक्षुरेव च ॥ ५ ॥
अपां सत्त्वाद्रसज्ञाथ जिह्वन्ती विविधान्रसान् ।
जायते चाथ भूसत्त्वात्तथैव घ्राणमिन्द्रियम् ॥ ६ ॥
सत्त्वात्तेषां समस्ताच्च तथाऽन्त:करणं भवेत् ।
मनो बुद्धिरहङ्कारश्चित्तं चेति चतुर्विधम् ॥ ७ ॥

पूर्वं शब्दादितन्मात्रा * रूपमेवासीत् पञ्चीकरणदशायां तु भूतभावेनाऽऽविरासीदिति ।

३ "अग्नेराप:"—इत्यादय: श्लोका: स्पष्टार्था न व्याख्यानमपेक्षन्ते ।

७ समस्तात् = मिलितात् । पञ्चीकृतानीति, पञ्चीकरणप्रकारस्त्वल्पधियां सुबोधार्थं चित्रेणोपदर्श्यते । अस्मिन्निम्नलिखितचित्रे आ० वा०

---

* तन्मात्राशब्देन स्पर्शादिस्वेतरगुणाऽसङ्कीर्णा: शब्दादयो गृह्यन्ते । अयं भाव:—वैदान्तिकसिद्धान्ते गुणगुणिनोस्तादात्म्यात् पूर्वम् (=अपञ्चीकरणदशायाम्) आकाश: स्पर्शादिगुणासङ्कीर्णशब्दस्वरूप:, वायुश्च शब्दादिगुणासङ्कीर्णस्पर्शस्वरूप, आसीत् । एवमेव चान्यानि तेजआदीन्यपि भूतानि स्वस्वासाधारणगुणस्वरूपाण्येवासन्, पञ्चीकरणदशायां तु गुणान्तरसङ्कीर्णशब्दादिस्वरूपाणि । एवञ्च सत्यत्रेदमप्यवधेयम्—यथाऽपञ्चीकृतेषु भूतेषु "आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्य: पृथिवी"—इति कार्य्यकारणभाव: प्रतिपादितस्तथा पञ्चीकृतेष्वपि भूतेषु विज्ञेय:, छान्दोग्योपनिषदुपदर्शितयुक्तिसिद्धश्च । तथा च पञ्चीकृताकाशं प्रति शब्दतन्मात्रस्य मायायाश्च कारणत्वं, पञ्चीकृतवायुं प्रति स्पर्शतन्मात्रस्य पञ्चीकृताकाशस्य च कारणत्वं, पञ्चीकृततेज: प्रति रूपतन्मात्रस्य पञ्चीकृतवायोश्च कारणत्वं, पञ्चीकृताप: प्रति रसतन्मात्रस्य पञ्चीकृततेजसश्च कारणत्वं, पञ्चीकृतपृथिवीं प्रति गन्धतन्मात्रस्य पञ्चीकृतानां च कारणत्वमिति ।

आद्यद्याद्यारेणाऽऽकाशवाय्वादेस्तामसांशो ग्राह्यः । ताँश्चाकाशादीनाम्–तामसांशान् †

आ० वा० अ० ज० पृ०

प्रथमत एकैकं द्विधा विभज्य–

तत्रैकैकं च पुनश्चतुर्द्धा विभज्य–

स्वस्वाधिकार्द्धांशं परित्यज्येतराधिकार्द्धांशेषु योजनम् ।

अ· आ·

अ· वा·

वा· अ·

वा· ज·

वा· पृ·

यद्यपि "तासां त्रिवृतं त्रिवृतमेकैकां करवाणी'–ति श्रुतौ त्रिवृत्करणमेव प्रतिपादितं न तु पञ्चीकरणं तथापि श्रुत्यन्तरे पञ्चभूतोत्पत्तिश्रवणाद् "आकाशश्चाकाशमात्रा च वायुश्च वायुमात्रा च"–इति श्रुतौ चाकाशवाय्वोरपि स्थूलसूक्ष्मत्वश्रवणाच्च त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षकत्वमेव । नह्यपञ्चीकृतत्वातिरेकेणाकाशवाय्वोरन्यत्तन्मात्रत्वं श्रुत्युक्तमुपपद्यत इति । न चैवं सत्याकाशवाय्वोरपि रूपाद्युपलब्धिप्रसङ्ग इति वाच्यम् । तत्र रूपादिसत्त्वेपि स्वांशभूयस्त्वेन तदनुपलब्धेः । अत एव "पश्यन्ति

† अपञ्चीकृताकाशादिकार्य्याणां पञ्चीकृताकाशादीनां जडत्वेन तमोंशप्राधान्यात्तत्कारणीभूते तमोंशे एव शास्त्रकारैः पञ्चीकरणमुपदर्शितं, वस्तुतस्तु प्रकृतेस्त्रिगुणात्मकत्वेन परम्परया तत्कार्य्याणामपि पञ्चीकृताकाशादीनां त्रिगुणात्मकत्वेन सात्त्विकराजसांशयोरपि पञ्चीकरणं बोध्यम् । अन्यथा तु लोभकामक्रोधादीनां पञ्चविंशतिप्रकृतीनां रजआदिगुणकार्य्याणां पञ्चीकृताकाशादिभ्यो वक्ष्यमाणोत्पत्तिर्न स्यादिति ।

तेषामेव तु भूतानां पञ्चानां राजसांशतः ।
व्यष्टिरूपाद्विजायन्ते क्रमात्कर्मेन्द्रियाणि तु ॥ ८ ॥
आकाशस्य रजोभागाद्व्यस्ताद्वागभ्यजायत ।
वायोरजोंऽशतः पाणी पादावग्नेस्तथैव च ॥ ९ ॥
अपां तद्वद्रजोलेशादुत्पन्नं लिङ्गमिन्द्रियम् ।
भुवो व्यस्ताद्रजोंऽशाच्च पायुर्जज्ञे विसर्जकः ॥ १० ॥
अथ तेषां समस्तात्स्याद्रजोंऽशात्प्राणपञ्चकम् ।
प्राणापानसमानोदानव्यानाख्यं पृथक् पृथक् ॥ ११ ॥
एतावता तु भूतानां सात्त्विकं राजसं तथा ।
कार्य्यमुक्तं समासेन तामसं प्रोच्यतेऽधुना ॥ १२ ॥
तामसांशेभ्य एतेषां तन्मात्राणामनुक्रमात् ।
पञ्चीकृतानि खादीनि स्थूलभूतानि जज्ञिरे ॥ १३ ॥
पञ्चविंशतिसङ्ख्याकाः खादेः प्रकृतयोऽभवन् ।
तामसांशात्तथा पूर्वं सञ्ज्ञादर्शेऽनुकीर्तिताः ॥ १४ ॥

योगिनो वर्णान् नव वायौ प्रकीर्तितान्"–इत्यादिकं तत्तदुक्तमपि सङ्गच्छते । अत एव चाकाशे रूपव्यञ्जकस्य दूरत्वस्य सद्भावे "नीलं नभः" इति सर्वलोकानुभवोप्युपपद्यते । यद्यपि प्रायः शास्त्रकारैरयमनुभवो भ्रान्तित्वेनैवानुवर्णितः तथापि बाधकाभावेन तद्भ्रान्तित्वस्याऽनुपपत्तिः । किञ्च, अपञ्चीकृतानां भूतानां पञ्चात्मकत्वं तादात्म्येन वा? समवायेन वा? आद्ये पञ्चीकृतत्वश्रुतिव्याकोपः, एकभूतशेषश्च स्यात् । अन्त्ये आकाशवाय्वोरपि स्वसंसृष्टैः पार्थिवाप्यतैजसपरमाणुभिर्व्याप्तत्वात्तदीयरूपेण रूपादिमत्वाच्च युज्यत एव पञ्चीकृतत्वमिति सङ्क्षेपः ।

१४ तदेवमाऽऽकाशस्य तामसांशात्पञ्चीकृतात् लोभकामक्रोधमोहमत्सराः, † वायोस्तामसांशाद्धावनचलनवियोगप्रसारणाकुञ्चनानि, अग्ने.

---

† केचित्तु रागद्वेषभयलज्जामोहाख्यान्पञ्च नभोगुणानाचक्षते ।

पञ्चीकृतेभ्य एभ्यस्तु ब्रह्माण्डमुपजायते ।
तदन्तर्वर्तिनो लोका ऊर्द्ध्वाधःस्थाश्चतुर्दश ॥ १५ ॥
ब्रह्माण्डाच्च मनुश्चैव शतरूपा तथाऽभवत् ।
ब्रह्माण्डान्तर्निविष्टाया भूमेरोषधयोऽभवन् ॥ १६ ॥
ओषधिभ्यस्तथैवान्नं यवव्रीह्यादिलक्षणम् ।
प्राणिदेहस्थितेर्हेतुर्विचित्रं समजायत ॥ १७ ॥

स्तामसांशात् क्षुत्तृण्निद्राऽऽलस्यसङ्गाः, अपां तामसांशात् श्लेष्ममूत्र-स्वेदशुक्रशोणितानि, पृथिव्यास्तामसांशाद् अस्थिमांसनाडीत्वक्रोमाणि जायन्ते—इत्याह—पञ्चविंशतीति । एता एव भूतानां पञ्चविंशतिप्रकृतयः शरीरावच्छेदेनान्योन्यं सङ्कीर्णा * दृश्यन्ते । तत्र यद्यपि "रजसो लोभ एव च"—इत्यादिवाक्येन लोभादे रजःकार्य्यत्वेन पञ्चीकृततामसांशकार्य्यत्वो-क्तिरयुक्तेव तथापि "प्रमादमोहौ तमस"—इत्यादिवाक्येन मोहादीनां तमःकार्य्याणां भूयसामुपलब्धेरुपसर्जनीभूतरजःसत्त्वोपेतपञ्चीकृतप्रचुरता-मसांशकार्य्यत्वात्तामसांशादित्युक्तम् । एतासु पञ्चविंशतिप्रकृतिषु मध्ये लोभकामयोराकाशवद् बहुनापि धनेन पूर्त्यभावसामान्यादाकाशगुणत्वम्, क्रोधमोहमत्सराणामपि तद्वत्ताडनादिभिर्दुष्पूरत्वादुन्मादकवातहेतुत्वाद्वा तद्गुणत्वं बोध्यम् । धावनचलनवियोगप्रसारणाकुञ्चनानां च वायुवच्चल-नात्मत्त्वाद्वायुगुणत्वम्, क्षुत्तृटोश्चाग्निवद्दाहकत्वसामान्यादग्निगुणत्वं,

---

* अन्योन्यसाङ्कर्यप्रकारस्त्वीदृशः—लोभ आकाशस्य स्वीयो मुख्यो गुणः ; तत्र पार्थिवं रोम, जलीयं श्लेष्मा, तैजसो निद्रा, वायवीयं प्रसारणमित्येते चत्वारो गुणाः सङ्कीर्णाः । तथा धावनं वायोर्मुख्यो गुणः ; तत्र पार्थिवं त्वक्, जलीयः स्वेदः, तैजसी तृषा, आकाशीयः काम, इत्येते चत्वारो गुणाः सङ्कीर्णाः । एवं क्षुत् तेजसो मुख्यो गुणः ; तत्र पार्थिवी नाडी, जलीयं शोणितं, चलनं वायवीयम्, आकाशीयः क्रोधः—इत्येते चत्वारः सङ्कीर्णाः । तद्वच्छुक्रमपां मुख्यो गुणः ; स्तत्र पार्थिवं मांसं, तैजसः सङ्गः, वायवीयो वियोगः, आकाशीयो मोहः—एते चत्वारो गुणाः सङ्कीर्णाः । इत्थमेव च—अस्थि पृथिव्या मुख्यो गुणः ; स्तत्राकाशीयो मत्सरः, तैजसमालस्यं, वायवीयमाकुञ्चनं, जलीयं मूत्रं चेति चत्वारो गुणाः सङ्कीर्णा इति ।

पितृभुक्तान्नजाद्वीर्य्याच्छोणिताच्चाधिजायते ।
स्थूलो देहस्स तु प्रोक्तः पुरोद्भिज्जादिलक्षणः ॥ १८ ॥
एवं प्रपञ्चवृक्षस्य विततस्य समन्ततः ।
शाखायामधिरूढौ स्तो जीवेशौ द्वौ खगोपमौ ॥ १९ ॥
तयोर्जीवस्तु संसारवृक्षस्य द्वे फले सदा ।
अश्नाति सुखदुःखाख्ये ईशोऽनश्नन्प्रकाशते ॥ २० ॥
सञ्जिहीर्षावशात्तस्य स्वस्वहेतौ लयक्रमात् ।
पुनर्विलीयतेऽव्यक्ते व्यक्तमेतच्चराचरम् ॥ २१ ॥

इति श्रीईमन्मुकुन्ददासशिष्येण मोहनलालवेदान्ताचार्येण प्रणीते वेदान्तसिद्धान्तादर्शे उत्पत्तिप्रलयादर्शः ॥ २ ॥

निद्रालस्ययोरपि तेजसाऽभिभूतत्वेनोत्पत्तिदर्शनात्तेजोगुणत्वं, सङ्गस्यापि कामद्वारा क्रोधादिहेतुत्वेन परम्परयाऽग्निवद्दाहकत्वादग्निगुणत्वम् । श्लेष्ममूत्रस्वेदशुक्रशोणितानां चापोवद्द्रवीभूतत्वसाधर्म्यादपोगुणत्वं, अस्थिमांसनाडीत्वक्रोम्णां च पृथिवीवत्काठिन्यात्पृथिवीगुणत्वं बोध्यम् ।

१८ पुरा=सञ्ज्ञाऽऽदर्शे । उद्भिज्जादिलक्षणः=जरायुजाण्डजस्वेदजोद्भिज्जस्वरूपः । उद्भिज्जादित्वं चात्र विलोमगणनाक्रमेणोक्तम् ।

१९ इदानीं "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते, तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति"—इति श्रुत्युक्तरीत्या जीवेशयोः खगोपमत्वं संसारवृक्षस्य शाखास्वधिरूढत्वं चानुवर्णयति—एवमित्यादिना श्लोकद्वयेन ।

२१ इदानीं भूतभौतिकानामुत्पत्तिक्रमवैपरीत्येन लयक्रमं दर्शयति—सञ्जिहीर्षेति । स्वस्वहेतौ लयक्रमात्=स्थूलशरीरं पञ्चीकृतस्थूलभूतेषु, स्थूलभूतानि समष्टिव्यष्टिसूक्ष्मशरीरं चाऽपञ्चीकृतसूक्ष्मभूतेषु, विलीयते ।

॥ जगदुत्पत्तिवृक्षः ॥
ईशः
जीवः
सुखं
दुःखं
समानः
उदानः
चक्षुः
पादौ
माया
अस्मिंश्चित्रे —— इयं मध्यश्वेता सत्त्वगुणरेखा। मध्यतोबहुतिरोरेखाञ्चिता च ~~~ इयं रजोगुणरेखा। घनकृष्णा च —— इयं तमोगुणरेखा बोद्धव्या।

॥ अथ यौक्तिकादर्शः ॥

खण्डनादौ वृहद्ग्रन्थे प्रवेशार्थं धियोऽधुना ।
अद्वैतसाधिका युक्तीर्वच्म्यादर्शेऽच काश्चन ॥ १ ॥

जीवब्रह्मात्मनोस्तच यथावद्भेदवादिनाम् ।
निराकृत्य मतं पूर्वमद्वैतं साधये तयोः ॥ २ ॥

किं जीवब्रह्मणोर्भेदे मानमस्ति नवाथवा ।
न चेत् सिद्धोत्कथं भेदो, दर्शनीयमथास्ति चेत् ॥ ३ ॥

नाहं ब्रह्मेति चेन्मानं प्रत्यचं तन्निशम्यताम् ।
शुद्धचिन्माचयोर्भेदे मानं नोपाधिभेदकम् ॥ ४ ॥

अहङ्कारं परित्यज्य जीवोपाधिं निरीक्ष्यताम् ।
जीवो ब्रह्मास्ति तद्भिन्नो वेति वैदिकचक्षुषा ॥ ५ ॥

सूक्ष्मभूतेष्वप्यापः पृथिव्यां, पृथिव्यप्सु, आपस्तेजसि, तेजो वायौ, वायुराकाशे, आकाशः प्रकृतौ (=मायायाम्), प्रकृतिः (=माया) चिन्मात्रे विलीयते इत्यर्थः ।

इति श्रीमदुदासीनवर्य्यश्रीमन्मुकुन्ददासशिष्येण मोहनलालवेदान्ताचार्य्येण प्रणीते आदर्शालोके उत्पत्तिप्रलयादर्शः ॥

---

४ उपाधिभेदकं मानं शुद्धचिन्मात्रयोर्भेदे न (मानम्)—इत्यन्वयः । अयमाशयः—'नाहं ब्रह्मे'ति प्रत्यक्षेऽहमित्यंशेऽहङ्कारात्मकवृत्तिरूपो जीवस्योपाधिर्भासते तथा च तस्य ब्रह्मभिन्नत्वेपि प्रत्यक्चेतनस्य तादृशवृत्त्युपहितस्य ब्रह्मणाऽभेद एव, एवं "नाहं मायावीश्वरः"—इति प्रत्यक्षमप्यहङ्कारमाययोरहङ्कारेशितृत्वयोश्चैव भेदमवगाहते न तु तदुपहितयोरित्यनुसन्धेयम् ।

यद्यल्पज्ञत्वधर्मादीन्स्वान्विलोक्य तथेश्वरान् ।
सर्वज्ञत्वादिकान्धर्मान्भेदं ब्रूषे त्वमेतयोः ॥ ६ ॥
तदापि नो वयं ब्रूमः सार्वज्ञ्यादिविशिष्टयोः ।
अद्वैतं, येन तद्रुद्धा श्रुतिः स्वार्थं न साधयेत् ॥ ७ ॥
अल्पज्ञत्वादिकान् धर्मान्स्वान्विहाय तथेश्वरान् ।
सर्वज्ञत्वादिकाँस्त्यक्त्वा ह्यभेदः साध्यतां तयोः ॥ ८ ॥
द्वा सुपर्णादिवाक्येभ्यो भेदश्चेन्न स युक्तिभाक् ।
द्वैतानुवादतस्तेषामद्वैतैकपरत्वतः ॥ ९ ॥
किञ्च भेदं वदन्वादी प्रष्टव्योऽत्राधुना मया ।
प्रतीचो ब्रह्म भिन्नं वा ब्रह्म तद्भिन्नतां गतम् ॥ १० ॥
आद्ये ब्रह्मानृतं दुःखं जडं वापि भवेद् ध्रुवम् ।
प्रातिलोम्येन दुःखादेरञ्चतो भिद्यते यतः ॥ ११ ॥

---

७ तद्रुद्धा, ईश्वरो जीवाद्भिन्नः तद्विरुद्धसर्वज्ञत्वादिधर्माक्रान्तत्वात् घटात्पट इवेति तादृशसार्वज्ञ्यादिलिङ्गकभेदसाधकाऽनुमानविरुद्धा इत्यर्थः। श्रुतिः="तत्त्वमसि" "अयमात्मा ब्रह्म"त्याद्यभेदबोधिका श्रुतिः, स्वार्थं जीवब्रह्मणोरभेदं न साधयेदित्यर्थः।

९ "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति"—"निरञ्जनः परमं साम्यमुपैति"—इत्यादिवाक्येषु जीवेशयोर्द्वित्वसाम्यादिश्रवणाच्चेद्भेदस्तदापि न युक्तः, तेषां वाक्यानां सर्वज्ञत्वाल्पज्ञत्वादिधर्मविशिष्टयोर्लोकसिद्धभेदानुवादेनाऽभेदपरत्वादिति श्लोकार्थः।

११ प्रातिलोम्येन=अनृतजडदुःखादिभ्यो वैलक्षण्येन, अञ्चति=प्रकाशते, इति प्रत्यक् (त्वंपदलक्ष्यम्)। तस्माच्चेद्ब्रह्म भिन्नं तदा ब्रह्माऽनृतादिरूपं स्यादित्याह—आद्ये इति।

द्वितीये देहवृद्ध्यादेर्हेतुः प्रत्यक् न सम्भवेत् ।
न भवेच्च तथा व्यापीत्यात्मनोऽनर्थमाविशेत् ॥ १२ ॥
किञ्च भेदस्य धर्मी स्याद्भिन्नो वाऽभिन्न एव वा ।
भिन्नश्चेत्केन भेदेन स्वेन वाऽथ परेण वा ॥ १३ ॥
स्वेन भेदेन भिन्नत्वे स्फुट आत्माश्रयो मतः ।
स्वस्यैवाऽव्यवधानेन स्वापेक्षित्वात्स्वसंस्थितौ ॥ १४ ॥

---

१२ बृहत्वात्=व्यापकत्वात्, बृंहणत्वात्=शरीरवृद्ध्यादेर्हेतुत्वाच्च, ब्रह्म (तत्पदलक्ष्यम्), तस्माच्चेत्प्रत्यक्चैतन्यं भिन्नं तदा तद् व्यापकं शरीरवृद्ध्यादेर्हेतुश्च न स्यादित्याह—द्वितीये इति । आत्मनोऽनर्थम्, आत्मनः स्वस्यानर्थं परिच्छिन्नत्वरूपं सङ्कटम् ।

१३ किञ्च, जीवप्रतियोगिको भेदो ब्रह्मणि चेत्तर्हि कीदृशे ब्रह्मणि भेदस्य स्थितिः? भिन्नेऽभिन्ने वा?। अभिन्ने भेदस्थितौ व्याघातः, भेदाभाववति भेदप्रकारकज्ञानस्य शुक्तौ रजतज्ञानवद्भ्रमत्वप्रसङ्गश्च स्यात् । भिन्ने ब्रह्मणि चेद्भेदस्यावस्थितिस्तदापि वक्तव्यं केन भेदेन भिन्ने कस्य भेदस्यावस्थितिः,? स्वेन परेण वा? इति विकल्प्य निराचष्टे—किञ्चेत्यादिना । अत्रापि क ख-ग-घ-ङादीन्भेदान्प्रकल्प्य क—भेदेन भिन्ने क—भेदस्य स्थितावात्माश्रयः । ख—भेदेन भिन्ने क—भेदस्थितौ ख—भेदस्यापि भेदत्वाविशेषाद्भिन्ने एव स्थितेर्वक्तव्यतया पुनः ख—भेदेन भिन्ने ख—भेदस्य स्थितावात्माश्रयः, क—भेदेन भिन्ने ख—भेदस्थितावन्योन्याश्रयः । ग—भेदेन भिन्ने ख—भेदस्थितौ ग—भेदस्यापि भेदत्वाद् ग—भेदभिन्ने स्थितावात्माश्रयः, ख—भेदभिन्ने स्थितौ चक्रकम्, घ—ङाद्युत्तरोत्तरभेदभिन्ने ग—घादिपूर्वपूर्वभेदवृत्तौ चानवस्थेति सञ्ज्ञाप्रकरणे इवात्माश्रयादेः प्रकारोऽत्रापि द्रष्टव्यः ।

भेदेनाऽन्येन भिन्नत्वे त्वन्यस्याप्यस्य संस्थितिः ।
वक्तव्या भिन्न एव स्यान्नाऽभिन्ने व्याहतत्वतः ॥ १५ ॥
सत्येवं केन भेदेन भिन्न इत्यपि कथ्यताम् ।
स्वेन चेत्पूर्ववत्तर्हि दोषोऽत्रात्माश्रयो भवेत् ॥ १६ ॥
भेदेनान्येन भिन्नत्वे स्यात्तथाऽन्योन्यसंश्रयः ।
चक्रकं च तृतीयेन तथाऽन्येनानवस्थितिः ॥ १७ ॥
अथेयमनवस्थापि सोढव्या चेत्तदा वद ।
किं क्रमेण सकृद्वैषां भेदानां धर्मिणि स्थितिः ॥ १८ ॥
आद्ये भेदप्रवाहस्याऽनन्तस्य स्यादवस्थितिः ।
कथं सान्तपदार्थेषु स्थितौ चानन्तता भवेत् ॥ १९ ॥
उत्तरोत्तरभेदेन भेदव्यवहृतेः क्षयात् ।
प्राग्लोपश्च भवेद्दोषः प्रमाणापगमस्तथा ॥ २० ॥

---

१९ आद्येऽनन्तभेदप्रवाहस्य सान्तपदार्थेषु कथं स्थितिः स्यादित्यन्वयः । अन्तः=आद्यन्तयोरवधिः, तेनोर्द्ध्वोर्द्ध्वं धावन्त्यामधोऽधोधावन्त्यां चोभयविधायामप्यनवस्थायामयं दोषः सङ्गृहीतो भवति । यद्यपि जीवब्रह्मभेदस्य प्रक्रान्तत्वेन भेदधर्मिणोर्जीवब्रह्मणोर्न सान्तत्वं तथापि जन्यविनाश्यनात्मभेदाभिप्रायेणायं दोषो बोध्यः, अत्र तु पदार्थान्तरे वृत्तिसञ्चारो न स्यादिति दोषो बोध्यः ।

२० यद्वा अनेनैवानुशयेन दोषान्तरमाह–उत्तरोत्तरेति । धर्मिणि भिन्नत्वव्यवहारनिर्वाह एव भेदप्रयोजनं, तच्चेदुत्तरोत्तरभेदेनैव सिद्धं तदा पूर्वपूर्वभेदानां नैरर्थक्यमेवेत्यर्थः । तथा द्वित्राणामेव भेदानामनुभूतचरत्वेन तादृशानन्ताऽनन्तभेदप्रवाहोऽनुभवविरुद्धत्वात् (अप्रामाणिकत्वात्) अनुपपन्नः ।

तथाऽक्रमिकपक्षेपि केन भेदेन धर्म्मिणि ।
भिन्ने चाऽवस्थितिः कस्य स्यादचाऽविनिगम्यता ॥ २१ ॥
दुष्टत्वात्सर्वथैवैवं भेदस्य ब्रह्मजीवयोः ।
परिशेषादभेदः स्यात्तयोर्वेदप्रचोदितः ॥ २२ ॥
एवं घटपटादीनां भेदादौ खण्डनोक्तयः ।
अद्वैतमतसिद्ध्यर्थं प्रचार्य्यन्तां तथाविधाः ॥ २३ ॥
'घटादस्मात्पटो भिन्नः' किन्त्वेतद्भेदसाधकम् ।
प्रत्यक्षं साधयेद्भेदं शुद्धं संसृष्टमेव वा ॥ २४ ॥
नाद्यो भेदस्य धर्म्यादिघटितत्वान्निरन्तरम् ।
द्वितीयेपि च वक्तव्यं कीदृशस्तद्ग्रहक्रमः ॥ २५ ॥
ज्ञात्वा घटपटौ पूर्वं तद्भेदो गृह्यते ततः ।
यद्वा भेदं गृहीत्वैव गृह्येते तावनन्तरम् ॥ २६ ॥
अन्त्ये दोषः पुरैवोक्त आद्यपक्षेपि कथ्यताम् ।
भानं कीदृशयोरस्ति तयोर्भेदप्रसाधकम् ॥ २७ ॥

---

२१ युगपच्चेद् भेदा धर्म्मिणि वर्त्तन्ते तदा दोषमाह—तथेति, केन भेदेन भिन्ने धर्म्मिणि कस्य (भेदस्या) ऽवस्थितिरित्यन्वयः ।

२४ संसृष्टम्=घटपटात्मकधर्मिप्रतियोग्यन्वितम्, घटपटभेदँस्त्रीनेव प्रत्यक्षं गृह्णातीति तात्पर्य्यार्थः ।

२५ भेदस्य 'कस्य, कस्मिन्भेदः'—इति सर्वदा प्रतियोग्यनुयोगिसापेक्षत्वेन न निर्विकल्पकज्ञानगम्यत्वमित्याह—नाद्य इति । घटपटात्मकधर्मिप्रतियोगिभेदँस्त्रीनेव पदार्थान्पटो घटाद्भिन्न इति प्रत्यक्षं गृह्णातीति द्वितीयपक्षेपि किं क्रमेण त्रयाणां ग्रहो युगपद्वा? । तत्र क्रमपक्षं तावद्विकल्प्य निराचष्टे—द्वितीयेपीत्यादिना ।

२७ पुरैवोक्तः, भेदस्य नित्यं प्रतियोग्यादिघटितत्वेन तदविषयकप्रतीत्यविषयत्वलक्षण इत्यर्थः ।

स्वरूपेणैव चेत्तर्हि ज्ञायतां क्षीरनीरयोः ।
मिथः सङ्कीर्णयोर्भेदः स्वरूपेण च भातयोः ॥ २८ ॥
धर्मित्वादिस्वरूपेण वा घटत्वादिना यदि ।
भानं निरूपयेद्भेदं तदा चान्योन्यसंश्रयः ॥ २९ ॥
भेदव्यवस्थितौ सत्यां धर्मित्वादेर्व्यवस्थितिः ।
धर्मित्वादेर्व्यवस्थायां ततो भेदो भवेदिति ॥ ३० ॥
यौगपद्येन चेद्भेदं घटं चैव पटं तथा ।
त्रीनेतान् बोधयेन्मानं प्रत्यक्षं ते तदा वद ॥ ३१ ॥
असंसृष्टतयाऽन्योन्यमङ्गुलित्रयवद्भवेत् ।
भानमेषां त्रयाणां वा किं संसृष्टतयाऽथवा ॥ ३२ ॥
आद्ये घटः पटो भेद इत्येवंरूपता भवेत् ।
प्रत्यक्षस्यास्य, न स्याच्च पटो भिन्नो घटादिति ॥ ३३ ॥
संसृष्टत्वेन भानेऽपि घटादेर्ज्ञानपूर्वकम् ।
भेदज्ञानं भवेत्, किं वा तद् भेदज्ञानपूर्वकम् ॥ ३४ ॥

---

२८ किं स्वरूपतो घटपटयोर्भानं भेदस्य निरूपकं, धर्मित्वेन प्रतियोगित्वेन वा, आहोस्विद्घटत्वेन पटत्वेन । आद्ये दोषमाह–स्वरूपेणैवेति । निरुक्तमन्योन्याश्रयमेव स्पष्टयति–भेदेति । प्रतियोगिभिन्नत्वे सति भेदनिरूपकत्वं धर्मित्वं, तथा धर्मिभिन्नत्वे सति भेदनिरूपकत्वं प्रतियोगित्वमिति धर्मित्वप्रतियोगित्वयोर्भेदानन्तरं सिद्धिः, तथा स्वाश्रयघटभिन्नाधिकरणाऽवृत्तिर्जातिर्घटत्वं स्वाश्रयपटभिन्नाधिकरणावृत्तिर्जातिः पटत्वमिति घटत्वपटत्वयोरपि भेदानन्तरं सिद्धिस्तथा च भेदसिद्धौ धर्मित्वादेः सिद्धिस्तत्सिद्धौ च भेदस्येत्यन्योन्याश्रयः ।

३२ संसृष्टतया दण्डी देवदत्त इत्यादिवद्विशेष्यविशेषणभावेनेत्यर्थः ।

३४ तद्=घटादेर्ज्ञानम् ।

वज्रलेपायते दोषः पुरोक्तः पक्षयोर्द्वयोः ।
तस्माद्द्वैताऽऽग्रहं त्यक्त्वा चिन्तनीयं सदाऽद्वयम् ॥ ३५ ॥
भिन्नौ घटपटौ चैतद्यन्मानं द्वैतसाधकम् ।
तत्तु घटपटद्वैतं साधयेत्स्वात्मनो नच ॥ ३६ ॥
तथा च श्रुतिरद्वैतबोधिका मानमेययोः ।
अभेदद्वारतो धीवेद्यभेदेपि प्रमेययोः ॥ ३७ ॥
मानान्तरेण चेत्सिद्धोन्मानमेयोभयोर्भिदा ।
तदाऽनवस्थितिर्यद्वा क्वाप्यन्तेऽभेद इष्यताम् ॥ ३८ ॥
तस्मात्केनापि मानेन भेदः सेद्धुं नचार्हति ।
ज्ञात्वैतदन्ततोऽद्वैतं श्रुत्युक्तं परिचिन्त्यताम् ॥ ३९ ॥

---

३६ स्वात्मनो न च=स्वात्मकप्रत्यक्षप्रतियोगिकं भेदं न गृह्णातीत्यर्थः । तथा च विश्वाभेदबोधिका श्रुतिर्निरुक्तप्रत्यक्षप्रतियोगिकघटपटादिविषया-नुयोगिकाऽभेदप्रतिपादनद्वारा घटपटाद्योर्विषययोरप्यभेदे पर्यवसास्यति, तदभिन्नाभिन्नस्य तदभिन्नत्वनियमात् (=घटाभिन्नप्रत्यक्षाभिन्नपटस्य घटा-भिन्नत्वानियमात्) इति भावः ।

३८ यदि निरुक्तप्रत्यक्षप्रतियोगिको विषयानुयोगिको भेदो मानान्तरेण सिद्धोत्तदा मानान्तरेण तेनैव स्वप्रतियोगिकः स्वविषयानुयोगिको भेदो न गृहीत इति तत्रैव दत्तपदा श्रुतिर्विषयाणामपि मिथोऽभेदे पर्य्यवसा-स्यति । अथ मानान्तरस्यापि मानान्तरेण, तस्यापि च मानान्तरेण, भेदो गृह्येत तदाऽनवस्था, क्वचिद्विश्रान्तौ तु तदभेदद्वारा तद्विषयाणामपि मिथो-ऽभेदः सिद्धोदित्यलं बहुना, विस्तरश्चास्य खण्डनादौ बृहद्ग्रन्थे द्रष्टव्यः, अत्र तु बालव्युत्पत्तये दिङ्मात्रं प्रदर्शितमित्यनुसन्धेयम् ।

इति श्रीदमनमुकुन्ददासशिष्येण मोहनलालवेदान्ताचार्य्येण प्रणीते आदर्शालोके यौक्तिकालोकः ।

श्रुत्याऽद्वैते सुनिर्णीतेऽभयो भवति मानवः ।
द्वितीयाद्वै भयं यस्माद्भवत्येतत्सुनिश्चितम् ॥ ४० ॥
शोकमोहाम्बुधिं तीर्त्वा सुखसिन्धौ स्व आत्मनि ।
प्रतिष्ठामचलां प्राज्ञो विन्दते ध्यानतत्परः ॥ ४१ ॥

इति श्रीईमदुदासीनवरश्रीईमन्मुकुन्ददासशिष्येण मोहनलालवेदान्ताचार्य्येण प्रणीते वेदान्तसिद्धान्तादर्शे यौक्तिकादर्शः ॥

॥ अथ मतभेदादर्शः ॥

मतभेदा निरूप्यन्ते केचिदत्र समासतः ।
उक्ताः सिद्धान्तलेशादौ बालानां बोधसिद्धये ॥ १ ॥
तत्र तावत्परोक्षस्य व्यक्ताव्यक्तस्वरूपिणः ।
प्रपञ्चस्यास्त्युपादानं किमित्येतदिहोच्यते ॥ २ ॥
शुद्धं ब्रह्मास्त्युपादानं श्रीसर्वज्ञमुनेर्मते ।
ज्ञेयस्य ब्रह्मणो यस्माच्छ्रुतोपादानता श्रुतौ ॥ ३ ॥

---

३ साम्प्रतं सिद्धान्तलेशादौ बालानां बुद्धिप्रवेशार्थं तत्रत्याञ्जगत उपादानकारणत्वे जीवेशमायानां स्वरूपे च मतभेदान् दिङ्मात्रेण प्रदर्शयति–शुद्धमित्यादिना । ज्ञेयस्येति, "यतो वा इमानि भूतानि जायन्ते" इत्यारभ्य "तद्ब्रह्म, तद्विजिज्ञासस्व"–इत्यस्यां श्रुतौ जगदुपादानकारणस्य ब्रह्मणो विशेषेण जिज्ञास्यत्वमुक्तं, तच्च तस्यैव घटते यज्ज्ञानादज्ञानतत्कार्य्यनिवृत्तिस्सम्भवेत्, न च विशिष्टब्रह्मज्ञानादज्ञानतत्कार्य्यनिवृत्तिस्तस्माच्छुद्धमेव विजिज्ञास्यमुपादानञ्चेत्याशयः ।

तथा कार्य्यानुगं जाड्यं मायाख्यद्वारकारणात् ।
युज्यते ब्रह्मकार्य्येऽपि व्योमादाविति तन्मतम् ॥ ४ ॥
जडात्मनापि च ब्रह्म मायायोगाद्विवर्त्तते ।
न माया द्वारहेतुः स्यात्तच्चैतन्मिश्रभाषितम् ॥ ५ ॥
बिम्बत्वधर्म्मसंयुक्तं ब्रह्मह्येश्वरं परे ।
जगतः कारणं प्राहुर्यः सर्वज्ञ इति श्रुतेः ॥ ६ ॥
मुक्तावलीकृतो मुख्यमुपादानं सम्मवीरे ।
मायामेवैश्वरीं, ब्रह्म तथा गौणतया स्थितम् ॥ ७ ॥
केचिन्मायाश्रयेशस्य प्राहुर्व्योमादिहेतुताम् ।
जैवाऽविद्योत्थभूतोत्थं तथान्तःकरणादिकम् ॥ ८ ॥
यथा व्योमाद्युपादानमीश्वरोऽस्ति श्रुतौ श्रुतः ।
तथान्तःकरणादेः स्याज्जीव इत्यपि केचन ॥ ९ ॥
माया स्यात्परिणामाख्यमुपादानं विभोरियम् ।
ब्रह्म तद्वद्विवर्त्ताख्यमुपादानं परे जगुः ॥ १० ॥

---

५ द्वारहेतुः=द्वारकारणम् । मिश्रभाषितं,=वाचस्पतिमिश्रेणोक्तम् ।

६ परे=विवरणानुसारिणः ।

७ गौणतया=जगदुपादानमायाधिष्ठानत्वेनोपचारात् ।

८ केचित्=मायाऽविद्याभेदवादिनः, प्रतिबिम्बत्वविशिष्टमायाश्रयेश्वरस्य वियदादिकारणत्वमन्तःकरणादिकं त्वीश्वराश्रितमायापरिणाममहाभूतसंसृष्टजीवाऽविद्याकृतभूतसूक्ष्मकार्य्यमिति जीवस्यापि कारणत्वमित्याहुः । एतन्मतं चायिमसङ्ग्रहचित्रे नोपन्यस्तम् ।

९ केचन=मायाऽविद्याऽभेदवादिनः । अविद्याऽभिन्नमायापरिणामवियदाद्युपादानेश्वरवज्जीवोऽपि स्वाध्यस्तान्तःकरणाद्युपादानमित्याहुः ।

१० परे=पदार्थतत्त्वनिर्णयकाराः ।

जीव एव भवेत् स्वस्मिन्स्वप्नद्रष्टेव कारणम् ।
ईशादिसर्ववस्तूनामित्याहुरपरे जनाः ॥ ११ ॥
मनोमयप्रपञ्चस्य जीवोऽयं हेतुरिष्यते ।
बाह्यखादेस्तथैवेशः श्रीविद्यारण्यदर्शने ॥ १२ ॥
एवं विश्वस्य विश्वस्य† ययोपादानतोदिता ।
येनाचार्य्येण, तत्सम्यक् प्रत्यपादि समासतः ॥ १३ ॥
अथेशजीवयोः सम्यक् स्वरूपं प्रविविच्यते ।
वैदान्तिकैर्यथा तैस्तैर्मतं बुद्ध्यनुरूपतः ॥ १४ ॥
श्रीसर्वज्ञमुनीनां तु मतेऽन्तःकरणे भवेत् ।
प्रतिबिम्बोऽसुस्त्वेशोऽविद्यायां प्रतिबिम्बितः ॥ १५ ॥
चिन्मात्राश्रितमायायामीश्वरः प्रतिबिम्बितः ।
उक्तो जीवस्त्वविद्यायां ग्रन्थे विवरणाभिधे ॥ १६ ॥
शुद्धसत्त्वात्ममायायामीशः स्यात्प्रतिबिम्बितः ।
जीवो मलिनसत्त्वायामविद्यायामितीतरे ॥ १७ ॥
विक्षेपशक्तिभूयिष्ठमायायां प्रतिबिम्बितम् ।
प्राहुरीशं परेऽविद्याप्रतिबिम्बं च देहिनम् ॥ १८ ॥

---

१५ अविद्यायाम्=मायाप्रदेशरूपाऽनन्ताविद्यायाम् ।

१७ इतरे=तत्त्वविवेककाराः ।

१८ परे=मायाऽविद्ययोरभेदवादिनः केचित्, चिन्मात्राश्रितविक्षेपशक्तिप्रधानमायाप्रतिबिम्ब ईश्वरः, मायाऽभिन्नावरणशक्तिप्रधानाविद्याप्रतिबिम्बो जीव इत्याहुरित्यर्थः ।

---

† विश्वस्य=विश्वासपूर्वकम् ।

घटावच्छिन्नखस्योदे प्रतिबिम्बो यथेक्ष्यते ।
कूटस्थक्लृप्तबुद्धौ स्यात्प्रतिबिम्बोऽसुभृत्तथा ॥ १९ ॥
मेघाकाशस्थनीराभा याः सर्वबुद्धिवासनाः ।
ता मायास्थानिकास्तत्र स्यादीशः प्रतिबिम्बितः ॥ २० ॥
एवमेवंविधो ह्यर्थो विद्यारण्यमुनीश्वरैः ।
पञ्चदश्यां सुनिर्णीतश्चित्रदीपे सविस्तरम् ॥ २१ ॥
बिम्बचैतन्यमीशः स्यात्प्रतिबिम्बोऽसुभृद्भवेत् ।
अविद्याया, भितीत्येवं प्राहुर्विवरणानुगाः ॥ २२ ॥
एवमेते समाख्याता मतभेदाः प्रतीकशः ।
स्फुटं सिद्धान्तलेशोक्ताः प्रतिबिम्बेशवादिनाम् ॥ २३ ॥
नीरूपस्य चितो दृष्ट्वा प्रतिबिम्बाद्यसङ्गतिम् ।
दोषं पूर्वमते, प्राहुरवच्छेदवादिनः ॥ २४ ॥
अन्तःकरणसम्भिन्नं चैतन्यं जीव उच्यते ।
तथा तस्य नियन्ता चाविद्यावच्छिन्न ईश्वरः ॥ २५ ॥
राधेयत्वं यथा कुन्तीपुत्रस्य ब्रह्मणस्तथा ।
जीवभावो भवेत्तेन क्लृप्तश्चेशोऽस्त्यविद्यया ॥ २६
तस्मान्न प्रतिबिम्बो वाऽवच्छेदो वापि युज्यते ।
चेतनस्याऽसुभृत्प्राहुरेतन्मुक्तावलीकृतः ॥ २७ ॥

---

१९ इदानीं पञ्चदशीकारमतेन जीवेशयोः स्वरूपं सदृष्टान्तं प्रपञ्चयति–घटावच्छिन्नेति ।

२४ अवच्छेदवादिनः=वाचस्पतिमिश्रानुयायिनः ।

२५ अन्तःकरणसम्भिन्नं=घटाकाशवदन्तःकरणाऽवच्छिन्नम् ।

सोऽयं सङ्ग्रहः ।

(आचार्य्याः)	(उपादानम्)	(जीवः)	(ईश्वरः)
सर्वज्ञमुनिः ।	शुद्धं ब्रह्म मुख्यं, माया द्वारम् ।	अन्तःकरणप्रतिबिम्बः ।	अविद्याप्रतिबिम्बः ।
वाचस्पतिमिश्राः ।	ब्रह्मैव	अन्तःकरणावच्छिन्नः ।	अविद्यावच्छिन्नः ।
विवरणानुसारिणः ।	बिम्बत्वाक्रान्तं ब्रह्म ।	अविद्याप्रतिबिम्बः ।	बिम्बचैतन्यम् ।
प्रकाशानन्दयतिः ।	माया मुख्यं, ब्रह्म गौणम् ।	ब्रह्मैव	जीवकल्पितः ।
मायाऽविद्याऽभेदवादिनः केचित् ।	ईशो व्योमादेः, जीवोऽन्तःकरणादेः ।	आवरणशक्तिप्रधानाविद्याप्र०	विक्षेपशक्तिप्रधानमायाप्र०
पदार्थतत्त्वनिर्णयकाराः ।	ब्रह्म विवृत्तं, माया परिणामि ।		
अपरे ।	जीव एव ।		
तत्त्वविवेककाराः ।		मलिनसत्त्वप्रधानाविद्याप्र०	शुद्धसत्त्वप्रधानमायाप्र०
विद्यारण्यस्वामी ।	ईशो बाह्यखादेः, जीवो मनोमयस्य ।	कूटस्थकृप्तबुद्धिप्र०	अखिलबुद्धिवासनाप्र०

एवं जीवेशयोरूपे शास्त्रविप्रतिपत्तयः ।
प्रदर्शिताः समासेन बालानां बोधहेतवे ॥ २८ ॥
यया यया नृणां बोधो भवेदद्वैतवस्तुनः ।
प्रक्रिया सैव साध्वी स्यात्संसारानर्थवारिणी ॥ २९ ॥
अप्रकल्पितशुद्धात्मज्ञापकत्वान्न सम्भवेत् ।
दोषावहो विरोधोयं कल्प्यमानेषु वस्तुषु ॥ ३० ॥
उद्देश्यं मुख्यमेवेदं वेदान्तस्य विशेषतः ।
ययाकयापि रीत्या स्यात्पुंसां बोधः परात्मनि ॥ ३१ ॥
वेदान्तेन सुनिर्णीते पूर्णे शुद्धात्मवस्तुनि ।
ब्रह्माहं भावयेद्यद्वा दासोहमिति भावयेत् ॥ ३२ ॥
सर्वथापि न जीवोयं भावयन्दोषभाग् भवेत् ।
दृढं भावयतोरन्ते द्वयोरद्वैतशेषणात् ॥ ३३ ॥
दासोहं भावयंश्चेन्न दासः स्वामिमयो भवेत् ।
तदा दासस्य दासत्वं कीदृक् स्याद्ब्रूत सत्तमाः ॥ ३४ ॥

---

२९ नन्वेवं परस्परं विरुद्धत्वाद् वैदान्तिकानां किमपि मतं न ग्राह्यमित्याशङ्कैकस्थादितारापरिहारेणाऽरुन्धतीप्रदर्शयितृमतेष्विवात्रापि विरोधो न दोषावहः—इत्याह—यया ययेति ।

३२ अधुना वेदान्तानां परं प्रयोजनं दर्शयितुं तत्साधनयोः परभक्तिज्ञानयोरर्थत ऐक्यमभिप्रेत्य तद्भेदवादिनोर्वैदान्तिकापसदोपासकापसदयोः शास्त्रार्थाविचारिणोर्मौढ्यात्परस्परं विद्विषतोर्मतं निन्दयिष्यन्वेदान्तरहस्यमाह—वेदान्तेनेत्यादिना । शेषमतिरोहितम् ।

इति श्रीदमदुदासीनवर्य्यश्रीमन्मुकुन्ददासशिष्येण मोहनलालवेदान्ताचार्य्येण प्रणीते आदर्शालोके मतभेदादर्शः ।

स्वामी सर्वहृदिस्थोऽयं सर्वप्राणिनियामकः ।
ईश्वरः शक्तियोगात्स्याच्छुद्धं ब्रह्मैव नापरः ॥ ३५ ॥
तस्यैव तनवस्प्रोक्ता रामकृष्णादिलक्षणाः ।
मायाख्यशक्तिसंसर्गात्स्वतन्त्वतनुरीश्वरः ॥ ३६ ॥
मायाख्या शक्तिरस्मान्नो भिद्यते नो न भिद्यते ।
भिन्नाऽभिन्नाप्ययुक्तत्वान्नोऽनिर्वाच्या परात्मनः ॥ ३७ ॥
सत्येवं मायिनो ध्याता ध्यायति ब्रह्म चिद्घनम् ।
ब्रह्मध्यायी तथा ध्यायेन्मायिनं परमेश्वरम् ॥ ३८ ॥
रामकृष्णादिमूर्तीनां ध्यातापि ध्यानतत्परः ।
ध्यायति ब्रह्म चिद्रूपं शुद्धमेव न संशयः ॥ ३९ ॥
यथा दण्डविशिष्टं नो देवदत्तादिकं पृथक् ।
शुद्धव्यक्तेस्तथा मायी ब्रह्मणो नातिरिच्यते ॥ ४० ॥
एवं तत्त्वमजानन्तः केचित्तत्त्वाविवेकिनः ।
वेदान्तनाममात्रेण विद्विषन्तेऽधुनातनाः ॥ ४१ ॥
तन्न विद्मो जनैरेभिः किं स्वचित्तेऽवधारितम् ।
यन्नाम्नैव समं द्वेषो वेदान्तस्यास्ति शाश्वतः ॥ ४२ ॥
किं वेदान्तेऽनृतं चौर्यं हिंसा वा स्त्रैणताऽथवा ।
उक्तास्ति, यन्मृषा द्वेष एषां शास्त्राविचारिणाम् ॥ ४३ ॥
अहं ब्रह्मेति जीवस्य परेशत्वश्रुतेर्यदि ।
द्वेषः स्यात्सोपि च भ्रान्त्याऽन्यथाऽर्थस्यावधारणात् ॥ ४४ ॥
नह्यल्पज्ञत्वसार्वज्ञ्यविशिष्टाभेद ईरितः ।
वेदान्ते, किन्तु भागस्य † त्यागाच्चिन्मात्रयोः सतोः ॥ ४५ ॥

† भागस्य=सर्वज्ञत्वाल्पज्ञत्वादिरूपस्य विरुद्धांशस्य ।

एवमेव हि वेदान्तिब्रुवाः केचित्कलौ नराः ।
श्रुत्वैवोपासनावार्तां द्रहन्तीवेक्षिताः क्षितौ ॥ ४६ ॥
दुःखद्रुमकुठाराख्ये ग्रन्थे तेऽपि सुशिक्षिताः ।
अम्बिकादत्तगौडेन विद्वद्वर्य्येण धीमता ॥ ४७ ॥
मया स्वानुभवाच्चैष वर्णितोऽर्थः सविस्तरम् ।
ग्रन्थे स्वानुभवोद्रेकेऽपक्षपातावलम्बिना ॥ ४८ ॥
सर्वथा क्रोधकामादीँस्त्यक्त्वैकाग्रेण चेतसा ।
ध्येयो नारायणः पुंभिः सच्चिदानन्दविग्रहः ॥ ४९ ॥
एतावज्जन्मसाफल्यमेतावान् दुःखसंक्षयः ।
एतावान्सर्ववेदान्तसिद्धान्तादर्श ईरितः ॥ ५० ॥

इति श्रीईमन्मुकुन्ददासशिष्येण श्रीईमद्रामम्मिश्रशास्त्रिणां कृपापात्रेण मोहनलालवेदान्ताचार्य्येण निर्मितो वेदान्तसिद्धान्तादर्शः ॥

॥ शुद्धाऽशुद्धपत्रम् ॥

(अशुद्धम्)	(पृ०)	(पं०)	(शुद्धम्)
वस्तुतो गुरुभ्रातुः	१	२२	वस्तुतः सतीर्थ्यस्य
२६६	६४	१६	२६७

त्रिचत्वारिंशत्तमे पृष्ठे चित्रस्याधोविन्दौ खकारोपि येषु पुस्तकेषु विगलितः स्यात्तेषु पठनीयः । यथैकाशीतितमे पृष्ठे ।

† अयमष्टबर्हिर्भेदप्रतिपादकः श्लोकोप्यष्टाष्टसङ्ख्याप्रकरणस्यादौ परिपठितुमुचित इह तु प्रमादायात इति बोध्यम् ।

(अवशिष्टाऽशुद्धिपत्त्रम्)

(अशुद्धम्)	(पृ०)	(पं०)	(शुद्धम्)
सुषुप्त्यादावप्यहम्	६६	१६	सुषुप्त्यादावप्यहम्
सामानाधिकरण्यऽन्तर्ग	६८	१३	सामानाधिकरण्याऽन्तर्ग
ा च	७१	२३	मा च
साय	७१	२४	दाय
पञ्चीकृतायां	७४	२६	पञ्चीकृतायां
श्रुत्ववो	८३	२	श्रुत्वैवो
विन्दन्तामिति	९१	१३	विदाङ्कुर्वन्त्विति
वाङ्मनसोर्यया	३५	१०	वाङ्मनसयोर्यया

॥ शुद्धाऽशुद्धपत्रम् ॥

(अशुद्धम्)	(पृ०)	(पं०)	(शुद्धम्)
वस्तुतो गुरुभ्रातुः	१	२२	वस्तुतः सतीर्थस्य
व्यष्ठ्यज्ञानं	४	१६	व्यष्ट्यज्ञानं
एकत्वापि	७	२३	एकत्वेपि
जन्योऽदृष्टः	१३	६	जन्यमदृष्टम्
तत्प्रादिपदिकार्थ	१४	११	तत्प्रातिपदिकार्थ
चतुर्विध	२३	१३	पञ्चविध
त्मिकवृत्ति	२८	२०	त्मकवृत्ति
अभिमानात्मिक	२८	२०	अभिमानात्मक
अभिमानात्मिक	२८	२१	अभिमानात्मक
यतय	३१	८	यतयः
ग्राह्मो	३४	१०	ग्राह्यो
जिह्वाग्राह्यो	३४	१०	जिह्वाग्राह्यो
तामिस्रो ह्यन्ध	३७	७	तामिस्रश्चान्ध
मरामयं	४०	१५	मणमयं
स्नानं सन्ध्या	४१	३	स्नानसन्ध्ये
दृष्टार्था	४१	१५	दृष्टार्था
श्रुतार्था	४१	१५	श्रुतार्था
घटाभाव प्रमा	४२	१४	घटाभावप्रमा
ऽपेक्षितत्वात्	४३	१६	ऽपेक्षित्वात्
श्चापि	४४	२५	श्चनचापि
षड् बहिर्मदाः	४५	२	स्युर्बहिर्मदाः†
कट्वम्ललघणा	४५	७	कट्वम्ललवणा
पुर्य्यष्ठका	४६	१२	पुर्य्यष्टका
नियमश्चव	५०	३	नियमश्चैव
नित्यसुचि	५०	६	नित्यशुचि
हरिर्ब्रह्म	५४	१३	हरिर्ब्रह्म
चन्द्रेत्येवंक्रमेण	५४	१४	चन्द्राः क्रमेण
बाह्याचै	६०	१४	बाह्या चै
२६६	६४	१६	२६७

त्रिचत्वारिंशत्तमे पृष्ठे चित्रस्याधोविन्दौ खकारोपि येषु पुस्तकेषु विगलितः स्यात्तेषु पठनीयः। यथैकाशीतितमे पृष्ठे।

† अयमष्टबहिर्मदप्रतिपादकः श्लोकोप्यष्टाष्टसञ्ज्ञाप्रकरणस्यादौ परिपठितुमुचित इह तु प्रमादायात इति बोध्यम्।